Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IK

Center for Shaiva Studies, Pondicherry Collection

n Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IK

Adayar Library
Madras

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

K Ramachandra Sarma

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

Center for Shaiva Studies, Pondicherry Collection

omain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolka

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

[library stamp, illegible]

॥ श्रीः ॥

नादकारिका ॥

(सव्याख्या ।)

नादातीतं शिवं नत्वा नादज्ञानप्रसिद्धये ।
श्रीरामकण्ठरचितां व्याख्यास्ये नादकारिकाम् ॥

बुद्ध्यस्मितामनोभ्यो
विद्यातो रागतः कलायाश्च ।
मायापुंशक्तिभ्यो नादो
ऽन्यो दृश्यते ध्वनिभ्योऽपि ॥ १ ॥

अस्मिता अहङ्कारः । ततश्च बुद्ध्यादीनां मायान्तानां नां स्वकार्यैरेव सिद्धेः कार्यान्तरहेतुत्वे च प्रमाणाभा- पुरुषस्य तच्छक्तेश्चाविकारित्वेन वाक्समवायायोगात् नां च स्थूलानामुत्पत्त्यपवर्गयोगित्वेन कारणान्तरा त्वात् । अपि शब्देन तदुद्भूतानां वर्णानां च क्रम-

Center for Shaiva Studies, Pondicherry Collection

omain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolka

भावित्वेनाभिधायकत्वानुपपत्तेः तत्कारणत्वेन नादो दृ- प्रमाणेन निश्चीयत इत्यर्थः ॥

तथाहि—

श्रोत्रग्राह्या वर्णा उच्चरित-
ध्वंसिनः क्रमस्थितयः ।
अपरस्परोपकारादवि-
शिष्टानार्थवाचका युक्ताः ॥ २

ननु पदान्येव तावत्प्रकृतिप्रत्ययविभागेनार्थप्रत- शानि भवन्तु । वाक्यमेवाविशिष्टक्रियाकाराकान्वयं त्वेनास्तु । अत आह—

न च वर्णव्यतिरिक्तं
पदमन्यच्छ्रूयतेऽथ वाक्यं वा ।

पदवाक्यैकदेशभूतानां वर्णानां क्षणविध्वंसित्वेन प- रोपकारकत्वाभावस्योक्तत्वात्तद्व्यतिरिक्तयोश्च पदवाक्ययो- मादर्शनान्न तयोरपि अभिधायकत्वमिति प्रत्यक्षाने- त्वेनानुमानेनापि न तयोः सद्भाव इत्याह—

यच्चाक्षमिति निषिद्धं
तत्सदिति निषिध्यतेऽन्यतो ज्ञातु-

Center for Shaiva Studies, Pondicherry Collection

main. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kol

एतदेवाशङ्कापूर्वकं प्रपञ्चयति—

गौरिति नामादिपदं
श्रोत्रग्राह्यं सदस्ति चेन्नैवम् ।
गकारौकारविसर्जनीय-
ग्राह्यं यदतोऽन्यदत्रास्ति ॥ ३ ॥

...स्मादीत्यादिग्रहणाद्रक्तेत्यादिविशेषणपदं गच्छतीत्यादि-
...च गृह्यते । ततश्च ।

तेषां युगपद्भावा-
दपरोपलम्भेन पूर्वयोर्भावः ।
प्राप्ताद्विसर्जनीया-
त्खुरकंबललक्षणा न चिद्व्यक्तिः ॥

...चिद्व्यक्तिरर्थसंविदुदयः । केवलाद्विसर्जनीयात्तस्यास्त्वादि-
...त्तौ अश्वः पुरुष इत्यादावपि स्यादिति भावः । नन्वस्तु
...द्विसर्जनीयादर्थबुद्धिः । पूर्ववर्णजनितसंस्कारयुक्ता
...देव । यतो वर्णानां क्षणविध्वंसेऽपि न तत्संस्कारनाशः
...ऽन्तरे स्मृतिदर्शनादित्याशङ्कते ।

अथ चेद्विसर्जनीया-
त्पूर्वाक्षरजातसंस्कृतिसहायात् ।

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इहैव वाच्यबुद्धि-
र्विनिशङ्का न संभवति ॥ ५

परिहारः—

येऽर्थसंस्कारा अपि
बुद्धौ पूर्वमाहितास्तेषु ।
विज्ञानहेतवः स्यु
र्न ततोऽर्थे धीः प्रकल्प्यते येन

संस्कारा हि यैरेव पूर्वानुभूतैरर्थैर्बुद्धावा
तेष्वेव घटादिषु स्मृतिहेतवो दृष्टाः । न, अननुभू
दिषु । ततोऽत्रापि यैर्वर्णैस्ते बुद्धावाहिताः तेष्वेव
युक्ताः नार्थ इति पदस्य वाक्यस्य वा नार्थप्र
संभवति । यदाहुः "संस्काराः खलु यद्वस्तु
भाविताः । विज्ञानहेतवस्तत्र ततोऽर्थे धीर्न कल्प
स्मर्यमाणानुभूयमानवर्णसमूहात्मकं पदम् अभि
चेत् तन्न । स्मर्यमाणानां प्रदीपानां अर्थप्रकाशकत्व
ननु उक्तवद्वर्णानामर्थप्रतिपादकत्वासंभवात्तदन्यश
तदभिव्यङ्ग्योऽन्य एव अविनिर्भक्तो मायूराण्डर
र्णावभासकः क्रम एव पदात्मा पदव्यतिरिक्तश्च व
समस्तस्य जगतो युगपत्क्रमेण वार्थप्रतीतिहे

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

...स्य स्फोटोऽभ्युपगन्तव्यः । यतः स एव व्यवहर्तृणा-
...स्फुटयतीति वैयाकरणाः । तदेतन्नोपपद्यते । तथाहि ।
...त्र यत्तावदुक्तं वर्णव्यतिरिक्तः स्फोट इति तदयुक्तम्
...र्णव्यतिरेकेण तस्य स्फोटस्य तद्ग्राहकयोर्मध्ये स्थितिरुप-
...ति । यतः स हि वर्णेभ्यो भिन्नो वा स्यादभिन्नो वा ।
...तावद्भिन्नः । वर्णव्यतिरेकेण तस्योपलब्धिलक्षणप्राप्तस्यानु-
...ब्धेः शशविषाणादेरिव । न चानुमानात्स्थितिरुपपद्यते ।
...य प्रत्यक्षानिराकृतत्वात् । न चोपलब्धिप्राप्तत्वं तस्या
...द्धमिति वक्तव्यम् । ज्ञापकत्वात् कारको हीन्द्रियादि-
...क्त्यैवाज्ञातोऽपि कार्यं जानाति करोति संस्कारवद्वीजादि-
... । ज्ञापकस्य अक्षिनिकोचादेरिव ज्ञापकत्वस्यासंभवा-
...नुमानादनवस्था । न अज्ञापकश्च स्फोटोऽभ्युपगन्तव्यः ।
...क्षिनिकोचादिवदप्रतः संबन्धस्य अज्ञापकत्वादिति कथम-
...विन्द्रियादिवदनुपलभ्यो विकल्पयितुं शक्यते यदाऽभिन्नः
... वर्ण एव स्फोटः न तु तेभ्यो भेदेनावस्थित इति हस्तः
... इतिवत्स्फोटो वर्ण इति समाश्रुतिः । एकार्थाभिधानात्ततो
...तद्भेदादत्रार्थभेदः । तेन चार्थबुद्धिरुपपद्यते । यदप्युक्तं वर्ण-
...ङ्क्च इति, तदप्ययुक्तम् । स्फोटो हि बहुभिर्वर्णैराभिव्यक्तो,
...र्थप्रतीतिहेतुः स्यात् । एकैकेन वा । यदि बहुभिरभि-

Center for Shaiva Studies, Pondicherry Collection

main. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kol

व्यञ्जकाः तदा तेषामुच्चरितप्रध्वंसत्वेन: विसर्जनीयकाले ग
रौकाराभावाच्च विसर्जनीयमात्रात्तदभिव्यक्तिरिति पूर्व
दोषः । अथ पूर्वसंस्कारसहितोऽन्त्यो वर्णः तद्व्यञ्जक इ
तथापि स एव दोष इति केन हेतुनात्यन्ताप्रसिद्धः
कल्प्यते । अथ द्वितीयः । गकारादिना गोगवयगगन
स्फोटानां बहूनामभिव्यक्तिर्नो विशेषाभावात् अनेकार्थ
पत्तिप्रसङ्गः । किं च विभुत्वे चास्यैकपुरुषोच्चारितैव
व्यक्तिमत्त्वे सति विशेषाभावात् देशान्तरेऽपि प्रमात
मर्थप्रतिपत्तिः स्यात् । तथा कालान्तरेऽपि नित्यत्वेनाधे
विशेषत्वात् । न च तथाप्युच्यते ततो न विस् तर बु
कश्चिदर्थप्रतिपादको युक्तः । नितरामेव स्फोट इ श्रन
रान्तरेण पराभिप्रायमाह—

तद्बुद्ध्यधिरोहपदं
क्रमवृत्तस्य क्रमेण विज्ञानम् ।
वाचकमिष्टमदुष्टं
हेतुश्चेत्स्थूलशब्दजातस्य ॥ ७ ॥

व्यक्तं हि तावत्खुरकंबलादिलक्षणमर्थं बुद्ध्याऽध्यव
तदनुगुणं गौरित्यादिपदं चिन्तयैवानुसंधाय ततः स्थूलश
प्रयुङ्क्ते । ततश्च बुद्ध्यधिरोहितपदं बुद्ध्याधिरूढगत्वादि

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सहकृतं विवक्षिततत्तद्गोगवयाद्यर्थक्रमेण तत्तदर्थाकारमुत्पद्यमानं तत्तत्स्थूलशब्दोच्चारणकारणं तत्तद्बुद्धिवृत्त्यात्मकमेव विज्ञानं क्रमेण वास्य गवादेरर्थस्यादुष्टमभिधायकमिष्यतामिति । एतदपि निराकरोति ।

अस्त्वित्थं वाचकता
वाच्येभ्यो नैव भिद्यते येन ।
तद्वस्तु निरवशेष-
मविशेषेणैव बुद्ध्युपारोहि ॥ ८ ॥

इत्थं परामर्शज्ञानस्यान्तरस्य वाचकतास्तु । एवं सति वाच्यवाचकयोरभेदः । उभयोरपि साक्षादिरूपत्वेनैककारणत्वात् यद्देहादिरूपं वस्तु निरवशेषं बाह्याकारविशेषेण बुद्ध्यारूढं यतः । अत्र भेदमाशङ्कते ।

वाचकतैव विशेषो
वाच्याच्चेत्तद्विमर्शरूपत्वात् ।
अस्य विमृश्या वाच्या
भेदाभेदैरिदं च सत्किंतु ॥ ९ ॥

अयमेवास्य बुद्ध्याकारस्य वाचकस्य वाच्याद्बाह्याकाराद्विशेषः । यद्बाह्याकारपरामर्शरूपत्वाद्वाचकत्वं ततश्च वाचकैः परामर्शज्ञानभेदैर्गवादिलक्षणा बाह्याकारभेदा विमृ-

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्यमाना वाच्या भवन्तीति विशेषः । अत्रोच्यते । इदं
सत्किंचिदिति ।

रूपरसगन्धशब्दा
अर्था येनावमृश्यतां नीताः ।
सोऽन्तः संजल्पात्मा
नादः सिद्धो न विषयभावेन ॥ १०

सत्यमस्त्येवेदं वाच्याद्भिन्नमान्तरं विमर्शात्मकं विज्ञानं
तत्तु नाकारणमुत्पद्यते । कादाचित्कत्वात् । एतदुक्तं भव
बुद्धिर्हि तावद्बाह्ये चक्षुरादिना विषयीकृत एवार्थेऽध्य
सायिनी दृष्टा नाविषयीकृते अतिप्रसङ्गात् । ततश्चान्तरे बु
केनापि विषयीकृत एवार्थे परामर्शं करोति । अन्
सर्वदा सर्वार्थपरामर्शप्रसङ्गात् । तस्माद्रूपरसादयोऽर्थाः
वक्तृबुद्धेः परामृश्यतां नीताः स एवात्र नादो अन्तस्संज
त्मेति आन्तरस्संजल्पो बिन्द्वाकाराऽऽत्माकार्यत्वेन वि
यस्य स तादृग्विधः तस्यापि परामर्शज्ञानस्य कारणं व
कत्वेन सिद्धः न तु विषयाकारतया परिणतस्थूलशब्द इ
कथं पुनर्वक्तृगतो नादः प्रतिपत्तुर्वाच्यबुद्धिं जनयतीति
तदुच्चरितस्थूलशब्दाऽभिव्यक्तः प्रतिपत्तृगतो नादस्तस्य
वाच्यबुद्धिं जनयतीति वक्ष्यति कारिकोपसंहारे । एतदेव

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विषयीकुर्वन्सर्वान्शब्दार्थानेष वाचको नान्यः ।
दृष्टं सदप्यसत्तद्यस्मादेते सदा परामृष्टम् ॥

तदुक्तं 'न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते । अनुविद्धमिह ज्ञानं सर्वं शब्देन जायत इति । कथं पुनश्श्रीमत्पराख्ये 'पूर्ववर्णजसंस्कारयुक्तोऽन्त्योऽर्णोऽभिधायक' इत्युक्तम् । नादाभिव्यञ्जकत्वेनोपचारादित्यदोषः । इत्थं नादस्य वाचकत्वं प्रसाध्य पूर्वप्रतिज्ञातं बुद्ध्यादीनां तत्कारणत्वमाह—

बुद्ध्याकारो नास्मान्न मनोऽहङ्कारयोः कृतिर्येन ।
तत्कार्यशरीरेन्द्रियविकृतेः पृथगेवमव्यक्तम् ॥

यदेतद्वाचकत्वं तदस्मादेवोक्तात्कारणान्न बुद्ध्याकार इ-
[युक्तम्] । न च मनोऽहङ्कारयोः पृथग्भूतम् । एवमव्यक्त-
[म]पि न वाचकत्वेनेष्टमिति शेषः । तस्य गुणकारणत्वेनैव सिद्धेः । कार्यान्तरहेतुत्वे च प्रमाणाभावात् इति । अयं च ।

अव्यक्तत्वान्नादस्सूक्ष्मश्शब्दस्तु वाचकत्वेन ।
वाक्यपदे प्रविभिन्नः पदार्थबुद्धेरसङ्करो यस्मात् ॥

यस्मात्प्रतिपत्तृषु पदार्थबुद्धेरसङ्करो दृश्यते तस्मात्प्रतिपु-
[रु]षं तेषु वाक्येषु पदेषु च वाचकत्वेन भिन्नरूपोऽयं नादो [वा]ऽव्यक्तत्वेन सूक्ष्मशब्दवाच्यवाचकत्वेन स्थूलशब्दवाच्य इति ।

N. K. 2

Center for Shaiva Studies, Pondicherry Collection

ain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Ko

इत्थं नादस्वरूपमुक्त्वा तत्कारणभूतां महामायां प्रतिपा[illegible] य
तुमाह—

संवेद्यते न तद्वचागोपालाङ्गनादिपशुवृन्दैः [illegible]
बालैर्भिन्ना नादा उत्पत्त्यपवर्गयोगिनस्ते[illegible]

इह हि एकपुरुषविमर्शकाले सर्वेषां तदुदया[illegible] स्परभिन्नस्वभावैः पश्चात्मभिर्हेतुभूतैः प्रत्यवस्थाभिन्ना नादास्संवेद्यन्ते । पदार्थबुद्ध्यन्यथानुपपत्त्या शास्त्रतश्च [illegible]न्यन्ते । यदुक्तम्, "आगोपालाङ्गना बाला म्लेच्छाः [illegible] भाषिणः । अन्तर्जलगतास्सत्वास्तेऽपि नित्यं ब्रुवन्ति [illegible] इति । किमत इत्यत आह— **मूले उत्पत्त्यपवर्ग इति** कारणेन उत्पत्तिविनाशधर्मित्वं कार्यत्वमेषां [illegible] ततश्च कार्यत्वेनोपादानकारणं वाच्यम् एषां तदित्यु[illegible] स्वरः, सुमङ्गला मालिनिः महामाया ममना[illegible] घोषा वाक्त्रह्मकुण्डलिनी तत्त्वं विद्याख्यं तत्त्वमित्युक्तं सद्‌गागमेषु । इत्थं पराभिप्रायमनूद्य दूषयति ॥

सेयमवस्था कैश्चि-
त्पदविद्भिर्वर्ण्यते क्रियाशक्तिः ।
इह पुनरन्यैवोक्ता
पुरुषासमवायिनी वाग्यस्मात् ॥

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यस्मात्प्रतिपुरुषस्य वाक्समवायाभावान्नादादिक्रमेण शब्दोत्पादकत्वं न युक्तं परिणामित्वप्रसङ्गात् । तस्मान्नैवेयमुक्ता । एतदेव प्रपञ्चयति ।

अविकार्यस्वात्मोक्त-
स्तच्छक्तिश्चाप्यतो न योग्यौ तौ ।
बहुधा स्थातुं यद्वा
चैतन्यविनाकृतौ विकारित्वात् ॥
तत्पुंशक्त्यभिन्नो
नादोपादानकारणत्वेन ।

तस्मात्प्रतिपुरुषात्तच्छक्तेश्च भिन्ना कुण्डलिनी नादकारणं इति । यद्येवं मायैव परिणामिनी नादोपादानकारणमिनाम् । अत आह ।

अचिदपि शुद्धत्वा-
न्मायातोऽप्यन्या तदूर्ध्वगा कथिता ।

यदुक्तं मायोपरि महामायेति । आगमप्रमाणसिद्धा चेयं शब्दोपादानभूता महामायेत्याह ।

विद्यातत्त्वं विद्येशानां च भोगदं भुवनम् ।
एवमुक्तं चान्यैस्सदागमैश्चेश्वरश्च तद्धेतुः ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

इति ।

वाग्ब्रह्मणि निष्णात-
श्चिद्ब्रह्माप्नोति येन कथयन्ति ।

यदाहुः । शब्दब्रह्मणि निष्णातं परं ब्रह्माधिगच्छति । इति । किं च ।

सिद्धिर्मुक्तिश्च परा नादज्ञानक्रिया च सफलेति ।

कथयन्तीति पूर्वक्रियानुषङ्गः । यद्येवं नादज्ञानादेव परमुक्तिसिद्धेः कथं दीक्षैव मोचिनीति श्रीमत्स्वायंभुवादावुक्तम् ज्ञानस्यापि दीक्षाङ्गत्वेनैव मोक्षसाधनत्वान्न केवलस्येति वक्ष्यामः । अपि च स्थूलस्य पाशरूपस्य मायीयस्य शब्दस्य शिवादिशुद्धवस्तुप्रतिपादकत्वासंभवात् शुद्धस्य मन्त्रात्मनश्शब्दस्य कारणत्वेनाप्येषासिद्धेरित्याह ।

मन्त्रादिकारणत्वात्

ततश्चाङ्गारस्थानीयेषु एषुशब्देषु अभिव्यक्ता अग्निस्थानीयाः सूक्ष्मा मन्त्रशब्दाः कार्यकरा भवन्तीत्युक्तम् । श्रीमन्मतङ्गादौ । ततश्चायं तत्कार्यभूतः प्रागुक्तो नादः ।

विद्यारागादिकञ्चुकाद्भिन्नम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तत्कार्यमभिव्यङ्गा
दृक्क्रिययोर्मीलनाच्च भिन्नं यत् ॥

रागविद्याकलानां स्वकार्यैरेव सिद्धेः कार्यान्तरहेतुत्वे प्रमाणाभावात् अनेकतत्त्वपरिकल्पनाभावप्रसङ्गाच्च ।

स महामायाजन्यो नादः परमार्थवाचको युक्तः ।
येन स्थूलं शब्दं मन्त्रं तन्त्रात्मकं *प्रवर्तते वापि ॥

स्थूलस्य तु तदभिव्यञ्जकत्वाद्वाचकत्वमित्युक्तम् । एतदेवोपसंहरन्नाह ।

साप्रतिपुरुषं भिन्ना
वाक्शक्तिर्वाचिकास्थितेति ततः ।
वाचकजातं निर्मा-
यान्तरतस्तद्व्यनक्ति बाह्येऽपि ॥

स्थूलैश्शब्दैर्व्यक्ता-
स्सूक्ष्मानादात्मकास्ततोध्वनयः ।
वाच्यविभिन्नां बुद्धिं
कुर्वन्तो वर्धयन्ति जनयात्राम् ॥

अनेनैव च क्रमेण मन्त्राश्शब्दा अपि शिवादेरर्थस्याभि-

---

* भवेद्वापि इति पाठभेदः।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

धायका भवन्तीत्युक्तम् ।

इति नादसिद्धिमेना-
मकरोच्छ्रीभट्टरामकण्ठोऽत्र ।
नारायणकण्ठसुतः
काश्मीरे वृत्तपञ्चविंशत्या ॥

श्रीमद्घोरशिवाचार्यजन्यया परसंज्ञया ।
व्याख्यातो नादसिद्धिश्च प्रार्थितेन गुरूत्तमैः ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

॥ शिवाभ्यां नमः ॥

श्रीभट्टरामकण्ठकृतव्याख्यासहिता

सद्योज्योतिकृता

॥ मोक्षकारिका ॥

यान्भ्यां प्रकाशितं वर्त्म सिद्धान्ते सिद्धभावतः ।
गुरूणामपि तौ वन्द्यौ सद्योज्योतिबृहस्पती ॥
भोगमोक्षप्रदं नत्वा भोगमोक्षाय शंकरम् ।
भोगमोक्षेषु संक्षेपात् व्याख्यास्ये मोक्षकारिकाम् ॥

इह हि,

रुरुसिद्धान्तसंसिद्धौ भोगमोक्षौ ससाधनौ ।
वक्ष्मीति प्रतिज्ञायां पूर्वं,

'भोक्तुर्भोगाश्चितेव्यक्तिः' इत्यादिना भोगो भोक्तारश्च पशवोऽस्वतन्त्राः तेषां च भोगसाधनं कार्यकरणादिरूपं

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

क्षित्यादिकलान्तं विश्वं विश्वोपादानकारणं च मायार्थं प्रतिपादितम् । अधुना तु भोगसिद्धये भोक्तृणां किं तत्स्वत एव प्रवर्तते उत कर्तृप्रेरितमित्यत्र साधनान्तरं कर्तृलक्षणमुच्यते ॥

अजातमलसंबन्धः सर्वज्ञः सर्वकृद्विभुः ।
सकलो निष्कलोऽनन्तः स्वेच्छानन्तरकार्यकृत् ॥

निर्मुक्तातिशयैश्वर्यो मायां विक्षोभ्य शक्तिभिः ।
भोगिनां भुक्तये विश्वं विचित्रं कुरुते शिवः ॥

विश्वं मायोपादानत्वेन पूर्वोक्तं भोगसाधनं अदृष्टकर्तृकं तस्मिन् विशिष्टकार्यत्वात् विशिष्टज्ञानक्रियाकर्तृकत्वं कुम्भकारादिजन्यवन्निश्चितमिति विश्वस्य सावयवत्वान्नासिद्धः । नाप्यनैकान्तिकः सर्वस्यादृष्टकर्तृकस्य वनकुसुमादेरपि पक्षीकृतत्वात् । अत एव न विरुद्धः । विपर्ययव्याप्त्यभावात् । ‡ ननु अज्ञेन कर्त्रा सह दृष्टान्ते सिद्धव्याप्तिकादस्माद्धेतोः अज्ञ एव विश्वकर्ता संभवतीति इष्टव्याघातः ‡ न येनासावप्यजातमलसंबन्ध एव कुम्भकारस्यापि स्वकार्यनिष्पत्तौ मलेन अज्ञानेन अनुत्पन्नसंबन्धत्वात् । यदि हि तत्राज्ञानं भ्रान्तिर्वा भवेन्नैवासौ कुम्भं कुर्यात् । अपि तु

---

‡ न च त्रैरूप्याद्धेतुलक्षणं संभवतीत्युक्तमन्यत्र इत्यधिकः पाठः पुस्तकान्तरे विद्यते ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इष्टकां पटादिकं विकलावयवं कार्यानुपयोगिनं कुंभकार: कुर्यात्। तद्यथा सकलावयवं कुम्भं दृष्ट्वा कुम्भकारो बुद्धि-सौष्ठवयुक्तो अनुमीयते। न त्वज्ञो भ्रान्तो वा तथैवेश्वरोऽपि स्वकार्याद्विश्वविलक्षणादनुमीयमानोऽजातमलसंबन्ध एवानु-मीयत इति नेष्टविघात:। कश्चित ननु कुम्भकारस्य स्वका-र्यादन्यत्राज्ञानमस्त्येव। भवतु प्रकृतेऽस्य कुम्भविषये नास्ती-त्यत्र दृष्टान्तता। न त्वेवमीश्वरस्य स्वकार्यादन्यत्राज्ञानप्र-सङ्ग:। न तत्कार्यभोगमोक्षसाधनाविश्वव्यतिरेकेणान्यस्याभा-वात् ननु अन्यन्नास्तीति कुत: अस्तु तद्भोगसाधनं चेत्कार्य-करणादिवत्कार्यमेव तदसाधने तु तस्मिन् निष्प्रयोजने तस्याज्ञानं शशविषाणादाविव भूषणमेव यदाहु:। 'हेयो-पादेयतत्त्वस्य साभ्युपेयस्य वेदक:। य प्रमाणमसाविष्ट: न तु सर्वस्य वेदक:' इति अत एव विश्वव्यतिरेकेण अन्य-स्याभावात् सर्वज्ञ: सर्वकर्ता च विश्वकृत्। कुम्भकारस्यापि स्वकार्ये सर्वज्ञता सर्वकर्तृतासिद्धे:। न हि तस्य तत्रांशेना-प्यज्ञत्वे शक्तिवैकल्ये वा कुम्भ: ततो भवेत् इत्युक्तम्। अत एव कुम्भकारवत् स्वकार्यव्यापकत्वात् विभु:। कार्यस्य विभुत्वात्। कुम्भकारस्यापि हि स्वकार्यपृथुबुध्नोदरभोगेषु अव्याप्नुवत: तत्र पर्वतादाविव कर्तृत्वाऽसिद्धे:। ननु कार्य-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

सत्तावच्छरीरमपि विश्वकर्तुः प्राप्तं । न कुम्भकारादीनामपि स्वदेहस्पन्दादिकार्यं न शरीरान्तरपूर्वकं दृष्टं यतः । ननु तदपीच्छाजन्यमेव । सत्यं अत एव सर्वं कार्यजातं तमेव कारणत्वेन न व्यभिचरतीति विश्वकर्तापि इच्छानन्तरकार्यकृत् अनुमीयते इत्यदोषः । ननु इच्छापि मनोवृत्तिः कथं विश्वकर्तुः सा संभवति । इच्छा न मनोवृत्तिः अस्मदादीनामपि । किं तु बुध्यभिव्यङ्ग्या ज्ञानशक्तिरिव मनोभिव्यङ्ग्या क्रियाशक्तिरेवेत्युक्तं अस्माभिः मन्त्रवार्तिकटीकायाम् । *'शाक्तस्य हि तन्मनसस्त्विच्छा सैषा क्रियाशक्तिः' । इति । अतो भगवतस्तु अनावृतशक्तित्वात् न व्यञ्जकोपयोगः । ननु इच्छायाः शरीरान्तरनैरपेक्ष्येण तदधिष्ठितशरीरस्पन्दादिकर्तृत्वं दृष्टं न बाह्ये स्यात् मृदादिजन्ये घटादौ । सत्यं । अत एव सर्वदा अधिष्ठेयत्वेन विश्वं तस्य शरीरमिव अनुमीयत इति अत एव च कार्यदर्शनात् ज्ञानक्रियेच्छाशक्तिसाकल्यमेव अनुमीयते न कलारागविद्यादिशरीरयोगः । व्यभिचारात् इति सकलो निष्कलश्च विश्वकर्तेति अग्रे † भविष्यति किं च अनन्तः ज्ञत्वादिशक्तियोगात् आत्मवत् साधितं च आत्मनां

---

* शान्तस्येति पाठभेदः ।

† व्यक्तीभविष्यतीति स्थातव्यं प्रतिभाति ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अनन्तत्वं विभुता च भोगप्रकरणे इत्यतोपि विभुः । ननु घट-घटादिकार्यबहुत्वं कर्तृबहुत्वनाविनाभावसिद्धं इति अत्रापि क्षित्यादिजलान्तानि विश्वशब्दवाच्यानि बहूनि कार्यत्वेन ॥ बहवो विश्वकर्तारः अनुमेयाः । सत्यं यदि ह्येषां एकभोगप्रयोजनता न स्यात् प्रतिपादिता च ।

'कलोद्दलितचैतन्यो विद्यादर्शितगोचरः' इत्यादौ । यच्च भिन्नमप्येकप्रयोजनं तदेकबुद्धिमत्कर्तृजन्यं प्रासादादि निश्चितमिति । निर्मुक्तातिशयैश्वर्यः । तस्यैव समस्तविश्वकरत्वात् । स च शिवः परोपकारायैव प्रवृत्तः । सर्वत्र तद्धर्मयुक्तः प्रमाणसिद्ध इति ॥

अत्र सांख्यच्छायया परः ।

चित्रास्तंतुगुणाश्चित्रः पटो दृष्टो न शंकरात् ।
यथा तद्वत् जगच्चित्रं चित्ताद्बीजान्न शंकरात् ॥

न पटोपकारकं कुविन्दं अपह्नुत्येदं युज्यते वक्तुं भूयो विरोधात् । किं तु सत्यपि तस्मिन् विश्वकर्त्रा शिवेन अस्य हेतोः दृष्टान्ते व्याप्तिः असिद्धेति अनैकान्तिकता जगद्विशातुः मायाख्यस्य गमकत्वमेव । न कार्यमुपादानकारणं व्य-

॥ स्थितानीति शेषः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

भिचरति । यतः, नैष दोषः ॥

कुविन्दबुद्धिकर्मभ्यां न विना पटकारणम् ।
दृष्टं तन्तुसमाख्यातं उपादानमचेतनम् ॥ ४ ॥

यद्वत्तद्वज्जगद्बीजं उपादानं अचेतनम् ।
ज्ञानक्रिये महेशस्य परित्यज्य न कारणम् ॥५॥

उपादानकारणमपि तन्त्वादिकं विशिष्टज्ञानक्रियायुक्तपटादिकर्तारं विना न स्वकार्यं कुर्वत् दृष्टमिति कार्यमात्रं उपादानकारणवत्कर्तृमात्रेण व्याप्तं सिद्धमेवेति । विश्वस्याप्युपादानकारणवत्त्वेन । प्रत्युत *कार्यपूर्वत्ववत् कर्ता साध्यत इति न (अनैकान्तिकता) अधुना मीमांसकदृष्ट्या सिद्धसाधनम् ॥

आहापरो जगच्चित्रं वैचित्र्यात्कर्मणो भवेत् ।
फलं च कर्मतः पुंसां किमत्रेश्वरकारिता ॥

कार्यत्वान् तत्र कर्तृमात्रं अनुसंधेयं। भवद्भिश्च धर्माधर्मात्मकं कर्मैव कृष्यादिकर्मवत् कार्यजनकं अङ्गीकृतं इति किमन्यदनुमीयते ॥

सत्यमेतत्तथापीदं कर्मदृष्टमचेतनम् ।

---

* कार्यत्वात्कर्ता सिध्यत इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कृष्यादिवत्तु कर्तारं प्रज्ञावन्तमपेक्षते ॥

दृष्टमपि कृष्यादिकं कर्म न तु बुद्धिमत्कर्त्रा विना फलजनकं पुंभ्यो भोगान् आहृत्य दातुं समर्थं दृष्टमिति धर्माधर्मात्मकमपि कर्मत्वात् स्वफलदानाय ज्ञानातिशययुक्तम् । प्रत्युत तमेव विश्वकर्तारं असिद्धं साधयति इति न सिद्धसाध्यता तत्र दृष्टे सति न अदृष्टकल्पना युक्तेति ॥

अपरे ब्रुवते कर्तृ बहुधा चेतनैर्युतम् ।
पुंभिरेव भवेद्बीजं किं हरेणेति तन्न हि ॥ ८ ॥

कायिकव्यापारादौ कृष्यादाविव बहुधा चेतनैः दृष्टैरेव पुरुषैः युक्तं जगद्बीजं सर्वं कलादिकार्यं बहुकर्तृतया करिष्यतीति दृष्टहान्यदृष्टपरिकल्पनाभ्यां न कर्त्रन्तरसिद्धिः । तन्नहीति तन्न युक्तमित्यर्थः । यस्मात् तयोः प्रकृतिपुरुषयोः संबन्धमात्रं वा पुंसां कलादिकार्यकरणहेतुः विशिष्टो वा भोग्यभोक्तृलक्षणः संबन्धः । तत्र,

सामान्यो यदि संबन्धः उत्पत्तौ कारणं तयोः ।
ततः कलाहिकार्यस्य नित्योत्पादः प्रसज्यते ॥

व्यापकत्वात् प्रकृतिपुरुषयोः कैवल्यावस्थायामपि संयु-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

क्ततया संबन्धमात्रस्य भावात् । $कलादिकार्यकरणोत्पादे सति अनिर्मोक्षप्रसङ्गः ॥ अथ द्वितीयः पक्षः ।

विशिष्टश्चेत्तयोर्योगो वक्तव्यं तस्य कारणम् ।
येन नाकस्मिकं कार्यं दृष्टं क्वचन किंचन ॥१०॥

प्रकृतिर्हि न प्रकृतिस्वरूपतया भोग्या नापि पुरुषः स्वरूपेण भोक्ता । मोक्षाभावप्रसङ्गात् । अपि तु कलादिकार्यद्वारेण तत्संबन्धस्य हि कलादिजननात् जन्यस्य संयोगात्मकस्य तयोः भोग्यभोक्तृरूपस्य संबन्धविशेषस्य कर्ता वाच्यः । येन नाकर्तृकं कार्यं संभवतीत्युक्तम् ॥

ननु तयोरेवात्र कर्तृत्वं, किमन्येन? तन्न, यतः ।

पुरुषो न स्वतस्तावत् बीजं नो याति तं प्रति ॥

पुरुषस्य अशक्ततया प्रकृतेः स्वतः कार्यकरणकलादिनिर्माणे सामर्थ्यादृष्टेः प्रकृतेश्च अदृष्टतया विशिष्टमेवंविधं कर्मनिमित्तं पुरुषाय कार्यकरणं स्यादिति ज्ञानाभावात् भोग्यभोक्तृसंबन्धे न कर्तृकता किं तु संबन्धमात्र इति ॥

तस्माद्योगे वियोगे वा महेशः कारणं तयोः ॥

$ नित्यमिति शेषः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तस्माद्भोगमोक्षसाधनदर्शनान्यथानुपपत्त्या सर्वज्ञः सर्वकर्ता परमेश्वर एव । नान्यः ॥

तत्र लोकायतभूमिकया परः ।

स्वभावतो जगद्बीजं जगत्कर्तृ हरेण किम् ।
स्वभाव एव वक्तव्यो गत्वा दूरमपि त्वया ॥

परमेश्वरमपि कल्पयित्वा तस्य जगत्कर्तृत्वस्वभावो भवद्भिः कल्पनीयः । तद्वरं प्रकृतेरेव उभयवादिसिद्धायाः जगत्कर्तृत्वस्वभावः कल्प्यतां । एवं च न बह्वदृष्टं कल्पितं भविष्यति इति । तदयुक्ततरम् । यतः तस्य प्रकृतिलक्षणस्य जगत्कर्तुः ॥

स्वभावः प्रतिपत्तव्यः किं विशिष्टो जगत्कृतः ।

ननु कोऽयं प्रश्नः जगत्कर्तृलक्षण एव स्वभावस्तस्य । सत्यं किन्तु ॥

व्यापारः परतन्त्रस्य स्वतन्त्रस्याथवा बुधाः ॥

जगत्कारणात्मा तस्य स्वभावः किं बुद्धिमत्कर्तृप्रेरितस्य केवलस्य वा । तत्र ।

स्वतन्त्रस्येति पक्षेऽस्मिन् न मानमिति साधितम् ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अचेतनस्य कर्तृत्वपक्षे न प्रमाणमस्तीति साधितं पूर्वमेव । कथं साधितम् ॥

स्वतन्त्रं कार्यकृद्यस्मात् नोपादानमचित्क्वचित् ॥

अथ द्वितीयः स च युक्त एव ॥

प्रज्ञावच्छक्तिनुन्नस्य व्यापारो मानसाधितः ।

प्रज्ञावतः क्रियाशक्त्या प्रेरितस्य जगत्करणे व्यापारः तस्य प्रमाणसिद्धत्वात् इष्यत एव ततश्च ॥

प्रज्ञावान्प्रेरकस्तस्य यस्स विज्ञेय ईश्वरः ॥

यश्चेतनः स्वशक्त्या तत् प्रेरयति स एव ईश्वरः सिद्धः इति न स्वभाववादः । यद्येवं क्रियाशक्तिमात्रमेवात्र तत्प्रेरकमस्तु किमीश्वरेण तस्यापि तया विना कर्तृत्वासिद्धेः यदाहुः ॥

'या त्वं कर्तुः क्रियाशक्तिः ईश्वरस्य यया विना ।
तस्यापि कर्तृता नैव चण्डि तस्यै नमोऽस्तु ते ॥' इति

‡इच्छाशक्तिः पराशक्तिः प्रक्लृप्ता नान्य ईश्वरः।
प्रवर्तते यदुद्रेकात् दिवाकाले निशान्विते ॥
सुप्ताकाल इहान्ते सा निर्व्यापाराज्जगन्निधौ ।

‡ आहशक्तिरिति पाठभेदः ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यद्यस्मात् सैव शक्तिः प्रकृत्याधिकरणा प्रेरणोत्तरं सोद्रेकात् सामर्थ्यलक्षणात् मायातः जगत्करणाय प्रवर्तते, इति नेश्वरोऽन्यः । तदयुक्तम् ॥

उद्रेके कारणं तस्य
नान्यदस्ति महेश्वरात् ॥ १७

जडस्य स्वयं प्रवृत्तौ अप्रवृत्तौ वा सामर्थ्यं नास्तीत्युक्तम् । अतोऽन्यथानुपपत्त्या ज्ञानातिशययुक्तः परमेश्वर एव उद्रेके तस्याः कारणम् ॥

ननु सैव सर्वज्ञा भविष्यति ।

सर्वज्ञा सैव चेन्नास्ति
विवादो न च वस्तुनि ।

यद्येवं नास्ति विवादः, न च नामभेदाद्वस्तुभेद इति, ततो व्यतिरेकः तस्याः प्रकल्पित एवास्तु । तर्हि सर्वज्ञत्वादिधर्मिका प्रकृतिरेव ईश्वर इति । वेदान्तविदः ॥

परात्मनो महेशात्तु
दृक्क्रियाशक्तिशालिनः ॥ १८ ॥
चेतनाचेतनं विश्वं
भोक्तृभोग्यविभागतः ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

उत्पत्स्यते ततोऽन्येन
जगदीशेन किं फलम् ॥ १९ ॥

भोक्ता चापि स एवैको
वरमङ्गीकृतो विभुः ।

भोक्तृभोग्यादिभेदभिन्नात् चेतनाचेतनात् विश्वलक्षणात् कार्यादनुमीयमानं सर्वज्ञानक्रियायुक्तम् कार्यद्वारेण भोक्तृभोग्यादिस्वभावं एकमेवाद्वितीयं परमात्मसंज्ञं ईश्वरलक्षणं उपादानं अनुमेयमित्यद्वैतसिद्धेः, न भिन्नेश्वरकल्पना युक्तेति ॥

ननु चेतनानां नित्यत्वेन प्राक् भोगप्रकरणे प्रतिपादितत्वात् कार्यत्वमसिद्धम् । न *एकान्वितत्वेन नित्यत्वसंभवात्, अचेतनानामिव चेतनानामपि चिदन्वयादुपादानकारणं चेतनं सिद्ध्यत्येव । तदप्यनुपपन्नं । यतः—

चिदचिद्विश्वसंभूतिः
आत्मनो यदि सोपि हि ॥ २० ॥

चिदचिज्जायते यस्मात्
कार्यं कारणधर्मगम् ।

*अनेकान्वितत्वेनेति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

परमात्मनः सकाशात् यदि चेतनाचेतनं विश्वमुत्पद्यते ततः सोऽपि परमात्मा चेतनाचेतनस्वभावो भवेत् उपादानकारण-स्वरूपानुगता एव कार्याणां मूर्तिविशेषाः हेममृदादिजन्य-घटादीनां सिद्धाः। यतः। ततश्च—

विरुद्धावेककालस्थौ
धर्मावेकाश्रयं गतौ ॥ २१ ॥
इतरेतरनाशात् तौ
कुरुतो लोपमात्मनः।

विरुद्धयोः परस्परोपमर्देनैवात्मलाभात् घटतदभावयोरिव चेतनाचेतनयोः एकत्र एकस्मिन् काले न संभवः। अथ केनचित् भागेन चेतनोऽसौ केनचिन्नेत्युच्यते यद्येवं सभागत्वे सति घटादिवत्कार्यत्वात् परमकारणत्वायोगः।

अपि च—

उपादानत्वतो मृद्व-
त्परमात्मा न चेतनः ॥ २२ ॥

उपादानकारणमचेतनं मृदादि निश्चितं इति, परमात्मनोऽप्यचेतनत्वं, उपादानकारणत्वात्। चेतनत्वे वा, नोपादान-कारणत्वमिति ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

किंच,

तदुत्थाश्चापि भोक्तारः
उत्पाद्यत्वात् घटादिवत् ।

उपादानकारणात् उत्पद्यमानं घटाद्यचेतनमेव सिद्धमिति परमात्मलक्षणात् उपादानकारणात् उत्पद्यमानाः भोक्तारः आत्मानोऽप्यचेतनाः प्रसज्यंते भवतां चेतनाश्चैते, यथा स्वपरग्राहकत्वेन स्वसंवेदनसिद्धा इति, न तत्र उत्पन्नाः । तत् परमात्मवत् नित्या इति । ननु अन्वयादेषां अचेतनानामिव कार्यत्वमुक्तम् । तन्न युक्तम् । अनन्वयात् इति, न च आत्मन एव आत्मा ग्राह्यो भवति तत्र तस्य व्यापारविरोधात् । अपि तु ग्राहकत्वेनैव प्रत्यग्रूपतया सर्वदा भासत इति । उक्तमस्माभिः (परमोक्षनिरासकारिकावृत्तौ) विस्तरेण । तत्रैवावधार्यम् ।

ततश्च,

अचित्प्रसवधर्मा यत्
परमात्मा मृदादिवत् ॥ २३ ॥

प्रज्ञायत्क्षोभकापेक्षः
स्वजन्यजननाय तत् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यद्यस्मात् परमात्मनः उपादानकारणत्वेन अचेतनत्वमुक्तं, तत्तस्मादेव स्वकार्यनिष्पत्तये मृदादिवत् बुद्धिमत्कर्तृप्रेरितत्वम् अस्याभ्युपगन्तव्यम् । एवमद्वैतानुपपत्तिर्यतः ।

तस्मात् भोक्ता जगद्बीजं
महेशश्चापि शक्तिमान् ॥ २४ ॥

पृथक् पृथक् विनिश्चेयाः
प्रोक्तदोषोपशान्तये ।

तस्माद्भोक्ताऽनुत्पन्ना एव जगन्निधिश्च[1] जडः जगत्कर्ता सर्वज्ञत्वादिधर्मयुक्तो महेश्वरश्च परस्परं भिन्ना एव नित्या अभ्युपगन्तव्याः । तदुक्तम् तत्वत्रयनिर्णये— 'शंभुः पुरुषो माया नित्यं विभु कर्तृशक्तियुक्तं च । सुप्तेऽपि विकृतिजाते त्रितयं जागर्ति तत्वानाम्' इति । उपादानकारणादन्यः परमेश्वरः सिद्ध इति न दोषः कश्चित् । ननु अपरिणामिनी शक्तिः । तत्कथं शिवशक्तेः ज्ञानक्रियाभेद [2]उपपद्यते । सोऽपि न वास्तव एवं । तथा हि ।

---

1 जगद्बीजशब्दस्य जगन्निधिरित्यर्थः ।

2 उत्पद्यत इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सर्वज्ञानक्रियारूपा
शक्तिरेकैव शूलिनः ॥ २५ ॥

यदि तु ज्ञानशक्तेरन्या क्रियाशक्तिः स्यात् जडत्वाद्वामादिभेदपरिणामतश्च, अस्या मायाया इव ईश्वरसमवायो न भवेत् अपरिणामित्वात् तस्याः, इत्यकर्ता क्रियाशक्तिविकलत्वादीश्वरः प्रसज्यते, न च कर्ता विना विश्वकरणमुपपद्यते इति अवश्यं सर्वज्ञानाक्रियाशक्त्योरैक्यमभ्युपगन्तव्यम् । ननु ज्ञेयकार्ययोः भेदात् कथं न शक्तिभेदः । न तयोरप्यभेदात् । न हि ज्ञेयत्वं कार्यतामतिवर्तते, वस्तुस्वभावत्वे हि तस्य सर्वेषां सर्वज्ञताप्रसङ्गः न च कार्यत्वं ज्ञेयतां इति, न वास्तवो ज्ञानक्रियाशक्त्योः भेदः । अपि तु कल्पित एव । तथैव च क्रिया ।

त्रिधैव शक्तिर्वामाद्या
गीता व्यापारभेदतः ।

वामाद्यापि क्रियाशक्तिः व्यापारभेदेनैव त्रिधा भिन्ना गीता न वस्तुतः । वामा ज्येष्ठा च रौद्री च शक्तित्रयमतःपरम्' इति । अन्यथा हि ज्ञेयभेदेन भेदात् प्रत्यर्थं प्रत्यायकभेदकल्पनया प्रतिपरमाणु ज्ञानभेदप्रसंगेन तासां नैरात्म्यप्र-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सङ्गः । तद्यथैवानेकपदार्थावलोकनम् एकयैव ज्ञानशक्त्या-ऽनुभवसिद्धं प्रकाशितुं शक्यं, एवमुद्युक्तरूपायाः क्रिया-शक्तेः अनेककार्यकरणं सिद्धमबाधितमिति तद्भेदोऽपि व्या-पारभेदात्कल्पितः । व्यापाराणां तर्हि कथं भेद इत्युच्यते—

क्रियया मलिनान् पुंसो
निरुणद्धि महेश्वरः ॥ २६ ॥

अनादिमलरुद्धांस्तान्
कर्मयुक्तान् नुदत्यतः ।

क्रियाशक्त्या तावत् पूर्वमेवेश्वरोऽनादिमलयुक्तान् पशू-न्निरुणद्धि नियमयति । अतो नियमितांश्च कर्मविपाकानु-सारेण प्रेरयति । ननु व्यापकत्वात् तेषां कुतः प्रेरणा । सत्यं किं तु ।

ततस्तेषां च नुन्नानां
पत्या संजायते भृशम् ॥ २७ ॥

भोगसाधनसंबन्ध-
योग्यता भोगलोलिका ।

विज्ञानकेवलिवैलक्षण्येन तेषां कर्मानुसारेण तेषां कार्य-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कारणसंबन्धयोग्यतोत्पादनमेवेश्वरप्रेरणमुच्यते । ततस्तु—

शुद्धाशुद्धाधिकारस्थे
विद्येशेऽनन्त आत्मनि ॥ २८ ॥
अभिव्यक्तो जगद्बीजं
विक्षोभ्य कुरुते जगत् ।

शुद्धाशुद्धाधिकारिणं मन्त्रेशनायकं अनन्तं प्रेर्यं कृत्वा मायातो जगत्करोति पतिः । यच्छ्रूयते— 'विद्याराजाधिराजेशो जगद्भ्रामयतीच्छया ।' इति तदनु च,

जगतानेन संयोज्य
तान् पुंसो लौलिकावतः ॥ २९ ॥
भोगार्थं साधनाकारां
करोति स्थितिमीश्वरः ।

कर्मानुरूपं कार्यकरणैः तान् पशून् संयोज्य तेषां भोगार्थं साधनाकारां स्थितिं करोति ईश्वरः । ततश्च ।

स्थित्यन्ते सोपि संसारे
विश्रमार्थं प्रधावताम् ॥ ३० ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पशूनां प्रकृतीनां च
क्षमत्वोत्पादनाय च ।
ततः सर्वोपसंहारं
विधत्ते भगवानिति ॥ ३१ ॥

स्थितिसंरक्षणादानभावलक्षणा व्यापाराः भिन्नाः कथिताः । अनुग्रहमपि विधत्ते ।

मलस्वशक्तिरोधांते
दीक्षाशक्त्यैव मुञ्चति ।

वक्ष्यमाणवत् यदैव मलस्य ईश्वरशक्तेश्च रोधाधिकारो निवर्तते, तदा दीक्षयैव पशून् मोचयति ।

वामा ज्येष्ठा च रौद्री च
स्वतोऽभिन्नापि सा त्रिधा ॥ ३२ ॥
रोधविश्लेषहरणैः
विभिन्ना कर्मभिः क्रिया ।

अथ स्थितिसंरक्षणभावलक्षणानां व्यापाराणां संसाररोधफलत्वाद्रोधो वामाव्यापारः, आदानरूपः संहारः ज्येष्ठायाः, पाशहरणात्मकोऽनुग्रहः रौद्र्याः, इत्येतैः कर्मभिः अभिन्नापि

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्वतः, क्रियाशक्तिः विभिन्ना कथ्यते न परमार्थतः इति । सर्वज्ञानक्रियारूपा शक्तिरेकैव शूलिनः । इति । न दोषः कश्चित् ।

इत्येवं देवदेवस्य
सर्वकर्तृत्वमीरितम् ॥ ३३ ॥

एतेन सर्वकृत्वेन
सर्वज्ञोऽवाप्यते पतिः ।

ज्ञानं विना कुविन्दादीनां कर्तृत्वादृष्टेः भगवतः सर्वकृत्वतः सर्वज्ञत्वसिद्धिरित्युक्तं प्राक् । तथा हि—

उपादाननिमित्तैस्तु
फलेन च समन्वितम् । ३४ ॥

यथा पटं विजानाति
पटकारस्तथा भवः ।
उपादाननिमित्तैस्तु
फलेन च समन्वितः ॥ ३५ ॥

सर्वकर्ताऽपि तत्सर्वं
विजानाति यथा स्थितम् ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यथैव पटकारः तन्तुभ्यो देवदत्ताय मूल्यसंसिद्धये तुरीवेमादिभिः पटं कुर्वाणः त्रिकालामलज्ञानयुक्तः स्वकार्ये सिद्धः, तथैव विश्वकर्ता मायातो विचित्रकर्मनिमित्तं पशूनां भोगमोक्षार्थं विश्वमुत्पादयन् स्वकार्ये त्रिकालामलज्ञानयुक्त एवाऽनुमीयते इति सर्वज्ञत्वसिद्धिः ।

इत्थं सर्वार्थकारित्वात्
द्विरूपा शक्तिरात्मनि ॥ ३६ ॥

कलापिण्ड इवाभाति
शक्तिस्सा नित्यसंस्थिता ।
यया युक्तो महेशानः
सर्वं वेत्ति करोति च ॥ ३७ ॥

कलावानिति तत्वज्ञैः
सकलस्तेन गीयते ।

उक्तवत् सर्वज्ञानक्रियारूपा सैव शक्तिः नित्या अनेकरूपेव लक्ष्यमाणा भगवतः शरीरमुपचर्यत इति, सकलः कथ्यते शिवः । स एव तु—

न कलापिण्डसंबद्धः संबद्धोसौ यथा पशुः ॥
कदाचिदपि देवेशः तस्मात् गीतस्तु निष्कळः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

पशुवत्कलाद्यात्मकशरीराभावात् निष्कलो भगवानित्युक्तं प्राक् । अत्र परः—

नन्वस्य निष्कलत्वे तु
न ज्ञानं नापि कर्तृता ॥
कलाकलापयुक्तानां
दृश्यते चिद्धतां यतः ।

कलादियोगे एव पशूनां ज्ञानादिकं दृष्टमिति कलाद्यभावादीश्वरस्य ज्ञानाद्यभावः । नैष दोषः ।

चिद्व्यक्त्यर्थं कलायोगं
अपेक्षेतेसुसंस्थिते ॥

दृक्क्रिये मलसंरुद्धे
नेश्वरे रोधवर्जनात् ।

उक्तं हि— भोगप्रकरणे । पशूनां ज्ञानक्रिये मलरुद्धत्वात् कलादिव्यञ्जकापेक्षे विषयेषु प्रवर्तेते इति । परमेश्वरस्य तु अनाद्यनावृतत्वात् न ते व्यञ्जकापेक्षे इति सर्वदा सर्वार्थे ।

अथेशस्यापि सापेक्षे

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अथाज्ञत्वात् पशुवदीश्वरस्यापि दृक्क्रिये कलादिव्यञ्जकापेक्षे। यद्येवम्—

तदासौ जायतेपशुः ४१ ॥

कलादियोगात् देवदत्तादिवत्। ईश्वरः पशुः प्रसज्यते। भवतु वा का नः क्षतिः—

न चेश्वरं विना कार्यं
अतोऽन्यो वाच्य ईश्वरः।

ईश्वरं विना न विश्वलक्षणं कार्यमुत्पद्यत इति ततोऽन्यो ईश्वरो वाच्य इति अनवस्था।

कलास्सृष्ट्वापि तद्युक्तः
कार्यकृद्यद्यसौ ततः ॥४२॥

अत एव कलादिस्वकार्यकरणानि सृष्ट्वा ततस्तैर्युक्तो भगवान् सर्वं कार्यं करोतीत्युच्यते। यद्येवम्।

दृक्क्रिये निष्कलस्येष्टे
कलाभिः किं प्रयोजनम्।

यथैव कलादिभिरनपेक्षो निष्कल एव स्वात्मनः कार्यक-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

रणानि, तथैव विश्वमपि करोतीति किं तस्य कलादिशरीरकल्पनया इत्येवमादि विस्तरेण (नरेश्वरपरीक्षायाम्) वर्णितमिति ।

तस्मादलं प्रसङ्गेन
भोगमोक्ष[1]प्रसाधकः ॥ ४३ ॥

उक्तलक्ष्मा महेशानः
उपास्योऽयं मुमुक्षुभिः ।

तत्सर्वज्ञत्वादिलक्षणः परमेश्वर एव पशुभ्यो मोक्षप्रद इति श्रेयोऽर्थिभिः सदैव आराध्यः, नान्यः । इत्युक्तः ससाधनो भोगः ।

अथ मोक्षः ससाधन उच्यते ।

मलादिपाशविच्छित्तिः
सर्वज्ञानक्रियोद्भवः ॥

मोक्षस्तत्कारणं शंभुः
स्वशक्तिः करणं प्रभोः ।
पश्वात्मा मोच्यमानत्वात्
कर्मकारकमिष्यते ॥

1. प्रदायक इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नित्यमुक्ततया कर्तुं
मोक्षाख्या कर्मगाकृतिः ।

प्राक् भोगप्रकरणे विज्ञानकेवलिनां मल एव, प्रलयकेवलिनां मलकर्मणी, सकलानां तु मलकर्ममायालक्षणाः, पशूनां पाशाः प्रतिपादिताः। तेषु पाशानां यथासंभवं सर्वेषां विच्छित्तिः सर्वज्ञत्वसर्वकर्तृत्वाभिव्यक्तिश्च आत्मनां मोक्षो न अन्येषामिवान्यतमपाशविच्छित्तिः, अज्ञत्वं, अकर्तृत्वं, संक्रान्तिर्वेति, वक्ष्यामः । न च तस्य मोक्षस्य 'आत्मा ज्ञातव्य इत्यादाविवायं पशुः कर्ता, पशोरीश्वरसंस्कार्यत्वेन सर्वदा कर्मत्वात् । नापि प्रकृत्यादिकः पाशः, किं तु ईश्वर एव, तस्य च करणं स्वशक्तिः दीक्षाख्यैव, मुक्तिस्तावत्पाशविच्छित्तिः सर्वज्ञत्वाद्यभिव्यक्तिश्च, इति मोच्यगत एव विशेषो मोक्षः, न सांख्यानामिव मोचकगतः तस्य नित्यमुक्ततया मुक्त्यमुक्त्येः अविशेषप्रसङ्गात् । यदाहुः– 'संसरतिभोग्यभावात् तद्विनिवृत्त्या तु मोक्षदा प्रकृतिः । स्वात्मन एव न पुंसो लोपोऽसौ न स्वयं वेद ।' यतः इत्येवं विशिष्टोऽविशिष्टो वा सर्वश्चात्र मोक्षः प्रतिज्ञातः ।तस्य साधनमुत्तरं प्रकरणं तत्र तावत् पुरुषकर्तृक एव मोक्ष इति ज्ञानमोक्षवादिनः स्वयूथ्याः ।

अस्त्वात्मनीनो मोक्षो हि

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भोगवत्पुद्गलस्ततः ॥ ४६ ॥

मोक्षकर्ता विवेकादिः
साधनस्सम्प्रसिद्ध्यति ।

अस्त्वीशो विश्वकर्ता पुरुषास्तु स्वकृतैः धर्माधर्मैः शुभाशुभं भोगं भुञ्जते नेश्वरकृतैः। ननु तत्रापि परमेश्वरस्य अधिष्ठातृत्वमस्त्येव। भवतु, न पुनः कर्तृतेत्येवं त एवाज्ञानमलसंबद्धाः भ्रान्तितस्संसारभाजस्सन्तः तत्प्रतिपक्षाभ्यासविविक्तज्ञानोदयात् अज्ञाननिवृत्तौ तेषां सर्वज्ञतादिरूपावाप्तितः स्वात्मकर्तृक एव मोक्षो, नेश्वरकर्तृकः। तदयुक्तम् ।

अविवेकोऽवसायोत्थं
अज्ञानं विनिवर्तते ॥ ४७ ॥

विवेकज्ञानतो नान्यत्
कदाचिद्द्रव्यहेतुकम् ।
स्वकारणनिवृत्त्यैव
तन्निवर्तेत नान्यथा ॥ ४८ ॥

मलश्चाज्ञानहेतुस्स्यात्
अज्ञानत्वेऽस्य तुच्छता ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अथात्मधर्मो भावस्स्यात्
तुच्छत्वे तन्निवर्तते ॥

ज्ञानादिरफलः पुंसः
धर्मत्वेन निवर्त्यते ।
निवर्त्यत्वे नात्मधर्मस्स्यात्
तदनादिनिरोधकम् ॥

चैतन्यस्यात्मनस्तेन
निवृत्तिर्दीक्षया ततः ।
महेशमलमायादि-
वशगोऽणुस्सचात्मना ॥

कथं तेभ्यस्तदायत्त-
मात्मानं मोचयिष्यति ।
अस्यात्ममोचने शक्तिः
विद्यते न यतस्स्वयम् ॥

पाशानां वश्यतामेति
तेनेशो मोक्षकृद्वशी ।

युक्तं धर्माधर्मकर्तृत्वं पुंसां, कलादिभिरीषन्मलव्युदासेन तत्संबन्धात् उत्तेजितदृक्क्रियत्वात् । मलादिनिवृत्तौ तु

M K 4

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तस्यां तावत् ज्ञत्वमपि तदा येषां न समर्थं दृष्टं ईश्वरत्वं तेषां मुक्तौ भविष्यति इत्युच्यमानमतिसाहसम् ॥ ननु प्रमाणसिद्धैव शुक्तिकारजतादिभ्रमेषु ज्ञानादज्ञाननिवृत्तिः । मलंचाऽज्ञानमिच्छन्ति च आत्मनामनादिभवं । तदयुक्तम् । अज्ञानत्वायोगात्तस्य। न ह्यज्ञानं मलः। अपि तु अज्ञानहेतुः अज्ञानत्वे तु तस्य, आत्मधर्मत्वं तुच्छता वा स्यात्, तुच्छत्वे तु तस्याऽकिंचित्करत्वात् तन्निवर्तको ज्ञानादिरफलः, आत्मधर्मत्वे तु तस्य नित्यत्वव्यापकत्वादेरिव निवर्तयितुमशक्यत्वेन अनिर्मोक्षः। निवर्त्यत्वे न आत्मधर्मतेति वस्त्वन्तरमेवात्मनोऽनाद्युपरोधहेतुत्वात् अज्ञानहेतुश्चक्षुष इव पटलादिः । मलो वाच्यः । न च द्रव्यस्याज्ञानहेतोः पटलादेरन्यस्य वा ज्ञानान्निवृत्तिर्दृष्टा प्रतिपक्षत्वाभावात् । कथं तर्हि शुक्तिकारजतादौ ज्ञानान्निवृत्तिः । उच्यते द्विविधं हि अज्ञानं प्रागनुभूतसादृश्यस्य बुद्धचविवेकाध्यवसायात्मकं शुक्तिकादौ रजतादिज्ञानम् । काचकामलादिद्रव्यजन्यद्विचन्द्रादिविषयं[1] विकल्पज्ञानं च । तत्र पूर्वं नेदं रजतमिति विवेकाध्यवसायज्ञानात् निवर्तते। यत्पुनर्द्रव्यजन्यं, तस्य स्वकारणद्रव्यानिवृत्यैव निवृत्तिः। न ज्ञानात्‡ प्रतिपादितं तु द्रव्यहेतुकमेवाऽज्ञानमात्म-

1 द्विचन्द्रादिविषयमविकल्प इति पाठभेदः ।

‡ तिज्ञानात्तन्निवृत्तिसंभवादिति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नाम् । नेतरत् अवौद्धत्वात्तस्येति न ज्ञानात्तन्निवृत्तिसंभवः । पटलादेश्चक्षुर्वैद्यादिवत् ईश्वरादेव तन्निवृत्तिरिति ईश्वरकर्तृक एव मोक्षः नाऽत्मकर्तृकः । तथा चोक्तं शास्त्रान्तरे—'शिवादेवात्मनां मोक्ष' इति । श्रुतिरपि— 'यमेवैष वृणुते तेन लभ्यः' इति । अत एव क्रियानिवर्त्यत्वात् द्रव्यस्य ईश्वरक्रिययैव मोक्ष इत्युक्तम् । दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि' इति वक्ष्यामश्च । ननु ईश्वरस्य मोक्षकर्तृकत्वमपि कल्पयित्वा पाशानां निवर्तनस्वभावः तदा कल्पनीयः तेन विना तस्याप्यसिद्धेः । ततस्त एव तत्स्वभावात् निवर्तमानाः पुंसो मोक्षहेतवो भविष्यन्ति । किमीश्वरस्य कर्तृत्वकल्पनया, तदयुक्तं। यतः ।

न पुंसां मोचने शक्तिः
पाशानामपि विद्यते ॥
रज्वादिना स्वयं बद्धा
विमुञ्चत् दृश्यते यतः ।

जीवस्य स्वतः प्रवृत्तौ निवृत्तौ वा सामर्थ्यं नास्तीत्युक्तम् अतः पाशानामपि शिव एव (तदाऽपि) निवर्तकत्वात् पुंभ्यो मोक्षद इति, दृष्टे सति नादृष्टकल्पनेति । अत्र परः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

ज्ञत्वकर्तृत्वयोर्व्यक्तिं
पाशाः कुर्वन्त्यनेकधा ॥
मोक्षो व्यक्तिस्तयोरेव
मोक्षोऽतः पाशकारितः ।

दृष्टा हि पाशाः कार्यकरणलक्षणा एव भवावस्थायाम्, आत्मनां अनेकप्रकाराम् ज्ञत्वकर्तृत्वयोर्व्यक्तिं, कुर्वन्ति। मोक्षश्च ज्ञानक्रिययोर्व्यक्तिः। ततस्तामपि त एव दृष्टसामर्थ्याः करिष्यन्तीति, किं तत्रेश्वरस्य अदृष्टस्य कल्पनया ॥

तदयुक्तम्।

स्वाकाररञ्जितां पाशाः
पाशवृत्त्यनुरागिणीम् ।
क्रमान्वितां विनाशार्थां
व्याहतामल्पगोचराम् ।
तयोर्व्यक्तिं प्रकुर्वन्ति
निस्संज्ञत्वाद्धवेरिताः ॥

शक्नुवन्ति न मोक्षाख्यां
येनास्यास्सा विलक्षणा ।

यो हि यथाभूतव्यञ्जकशक्तियुक्तः प्रदीपादिः व्यञ्जकः

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सिद्धः, सोऽपि अन्यत्राप्यदृष्टे विषये तथाभूतशक्तिरेव प्रतीयते, कार्यकरणादिलक्षणश्च व्यञ्जकः प्रोक्तवदीश्वरप्रेरितोपि शरीरादौ आत्मग्रहहेतुत्वात् स्वाकारेणानुरञ्जितां स्त्र्यादिविषयानुरागिणीं क्वचित् कदाचित् किंचिद्विषयां रागद्वेषादिभिश्च व्याहतां कार्यत्वाच्छरीरादीनां नाशे सति विनश्वरीं भविनां ज्ञानक्रिययोः व्यक्तिं कुर्वन् दृष्टः इति तथाभूत-एव विषये तस्य व्यञ्जकत्वं सिद्ध्यति। न ततोऽत्यन्तविलक्षणत्वात् ज्ञानक्रिययोः, मुक्तावपि दीपस्येव ब्रह्माण्ड इति न पाशव्यङ्ग्यो मोक्षः इति तद्वैशिष्ट्यं मोक्षे ज्ञानक्रिययोः इत्युच्यते ॥

पाशाभिभाविका शक्तिः
सिद्धानां दृक्क्रियाभिधा ॥

तस्मान्न पाशजालोत्थं
जायारागं भजत्यसौ ॥

सर्वपाशनिवृत्त्या सिद्धस्य ईश्वरवत् ज्ञानक्रियात्मिका शक्तिः पाशविध्वंसिकेति न पशोरिव [1]पाशव्यङ्ग्या शरीरादावात्मग्रहानुरागं भजते ॥

---

1 पाशस्य व्यङ्ग्येति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

किं च–

न चोत्पन्नैर्विनष्टैर्वा
पाशैस्सा भिद्यते यतः ॥ ५८ ॥

ततस्तु पाशचेष्टाभिः
शक्तिर्नैवाऽनुरुद्ध्यते ।

नापि पशोरिव रागादिपाशचेष्टाभिः अनुरुद्ध्यमाना स्त्र्यादिविषयानुरागिणी सा सिद्धशक्तिः, पाशप्रळयेऽपि अविकृतेनैव स्वरूपेण ईश्वरशक्तिवदवस्थानात् । अपि च—

शक्तिस्सा सर्वविषया
न तेनैवाऽल्पगोचरा ॥ ५९ ॥

ज्ञेयकृत्येषु युगपत्
भावित्वान्न क्रमान्विता ।

आवरणाभावाच्च सा सर्वदा सर्वत्र सर्वज्ञेयज्ञप्तिकरी सर्वकार्यकरी च । न पशुशक्तिवत् कदाचित् क्वचित् किंचिद्विषया ।

सा च व्यक्त्यन्तराभावात्
न व्यक्त्यन्तरबाधिता ॥ ६० ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नाऽपि विद्येश्वराणां शक्तिव्यक्तिरिव परमुक्तिलक्षणेन व्यक्त्यन्तरेण सा सिद्धशक्तिर्बाध्यते । शिवसमत्वेन तस्याः प्रकर्षान्तराभावात् ॥ किं च—

प्रवृत्ता सा न साम्येन
ज्ञेये कृत्ये च बाधते ॥ ६१ ॥

न चापीश्वरेच्छया विद्येश्वरशक्तिवत् कार्ये प्रवर्तते निवर्तते वा शिवसमत्वात् सिद्धशक्तेरीश्वरप्रेर्यत्वस्य सर्वथा निवृत्तेः स्वतः शक्तत्वात् ॥

व्यञ्जयन्ति न तां पाशाः
न च भूयोऽभिभूयते ।
शिवेच्छाप्लुष्टबीजैस्तैः
शक्तिस्तेनाविनश्वरी ॥ ६२ ॥

येन न वक्ष्यमाणवत्पाशैः कार्यकरणैः पशुशक्तिवत् व्यज्यते शिवशक्त्याभिव्यक्तां तां प्रति दग्धबीजैश्च पाशैर्न पुनरभिभूयते सिद्धशक्त्यभिव्यक्तिः ततो न विनश्वरी पशुशक्तिव्यक्तिरिवेति‡ प्रकारान्तरेण नश्वरता परिहारः ॥

व्यंग्यव्यक्तिर्भवेत्तावत्
यावद्व्यञ्जकसंनिधिः ।

‡ रेवेति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

सिद्धशक्तावयं न्यायो
विद्यते नेति चोच्यते ॥ ६३ ॥

अभिव्यक्तिकरी शैवी
शक्तिस्तत्सान्निधानताम् ।
धाता सततमित्यस्मात्
अपि सैद्धी न पश्यति ॥ ६४ ॥

यदुक्तं प्राक् सिद्धानां सर्वथा ईश्वराधिष्ठानं निवर्तत इति ततो व्यञ्जकेनानधिष्ठितत्वात् दीपेनानधिष्ठानात् घटादेरिव अभिव्यक्तिर्निवर्तमाना विनाशिन्येव । नाऽयं दोषः । यतो न दीपवद्व्यङ्ग्यस्याऽऽवरणनिवृत्तिमनात्यन्तिकीं कुर्वन् परमेश्वरः शक्तिव्यञ्जक इष्टः, येनैष दोषस्स्यात् । सत्वात्यन्तिकीमावरणनिवृत्तिं पटलानामिव चक्षुर्वैद्यः कुर्वन् सिद्धानामात्मसदृशीं सिद्धान्तशक्तिव्यक्तिकरीं सिद्धशिवसमवायाच्छैवीं दृक्क्रियाशक्तिमभिव्यक्तितस्सन्निधापयतीति कुतः परतस्तस्या व्यञ्जकापेक्षा । शिवशक्तेरिव स्वतस्सर्वज्ञस्वरूपत्वादिति । न केवलं पाशैरव्यङ्ग्यत्वात्, अस्मादपि कारणान्न विनश्वरीति । अत एव न कार्यत्वेनानित्यत्वं मुक्तेर्व्यङ्ग्यत्वात् पूर्वव्यवस्थिताया एव ज्ञानादिशक्तेरावरणव्युदासेनाभिव्यक्तितस्सर्वविषयता न स्वरूपप्रतिष्ठितिरेवेत्युक्तस्सर्ववि-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

लक्षणो मोक्षः ॥

इत्थं विलक्षणायास्ते
सिद्धशक्तेर्न पाशकाः ।
व्यक्तिं कर्तुं समर्थास्तु
निवृत्तैस्तैर्यतो भवेत् ॥ ६५ ॥

उक्तं तावत्पाशव्यङ्ग्यायाः पशुशक्तितोऽत्यन्तविलक्षणत्वात्पाशाभावेऽपि भावाच्च मुक्तौ सिद्धशिवशक्तेर्न पाशव्यङ्ग्यत्वं सिध्यतीति ईश्वर एव तद्व्यञ्जको मोक्षहेतुः । ननु योगश्चित्तवृत्तिनिरोध, इति योगादिसंस्कृतमन्तःकरणमेव मोक्षहेतुरात्मनां, नेश्वर इति सांख्याः । तदयुक्तम् ।

योगो ज्ञानं तपःपूर्वं
भोगसाधनचेष्टितम् ।
प्रोक्तन्यायेन पाशत्वा-
न्न तन्मोक्षस्य साधनम् ॥ ६६ ॥

चित्तस्योक्तवज्जडत्वाद्वायोरिव योगादिसंस्कृतेनैव स्वप्रवृत्तिरूपतया आत्मनो माया निवर्तितव्या नान्यथेति विवेकाभावान्निवृत्तौ सर्वदैव निवर्तेत न वा कदाचिदिति अनिर्मोक्षः। सर्वदा वा मोक्ष एवात्मनो भवेत् । कश्चात्र योगादेरनुष्ठाता

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

यस्य शास्त्रोपदेशः। न तावदात्मा, निष्क्रियो भवद्भिरसावभ्युपगतो यतः। नापि चित्तं जडत्वात्। अपि च।

सुतीव्रा अपि नोपायाः
स्वात्मविच्छेदकारकाः।
असिधारा सुतीक्ष्णापि
न स्वात्मच्छेदिका यतः॥ ६७ न॥

न च चित्तस्य स्ववृत्तिनिरोधार्थं योगाद्यनुष्ठानं स्वत एवोपपद्यते। स्वात्मनि क्रियाविरोधादिति। तस्मादपि प्रवृत्तिनिवृत्तिहेतुरीश्वर एव सर्वत्र मोक्षकारणमिति। ननु ईश्वरोऽपि कथं न सर्वेषां युगपन्मोक्षहेतुः। अपेक्ष्याभावात्। न। मलपरिपाकापेक्ष्यत्वात्। अन्यथा यथादृष्टनियमानुपपत्तेः। तदुक्तं 'क्षीणे तस्मिन्नयया सा स्यात्परं निश्रेयसं प्रति' इति मलस्तु तथा स्वभावः कल्प्यमानो जडत्वात् कस्याचित्कदाचिच्च तथा परिणमन् नोपालम्भमर्हति। यदुक्तं तत्त्वत्रयनिर्णये— 'विनिवर्तते निरोधात्पुंबलतः परिणमन् मलः कालात्। परिणातिविशेषयोगात्स कदाचित्कस्यचित्कथं चिदेति' यद्येवम्।

रोधशक्त्यधिकारस्य
काले याते स्वयं त्वणोः।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

निवृत्ते तु मले शेषः
पाशव्रातो निवर्तते ॥ ६८ ॥

तन्निवृत्तौ स्वयं शुद्धा
दृक्क्रियाशक्तिरात्मनि ।
व्यज्यते सर्वविषया
नैवाऽतो मोक्षकृद्भवः ॥ ६९ ॥

पुंसां ज्ञानादिबलाद्रोधशक्तेर्मलस्य परिपाकात्तद्रोधाधिकारकालोपक्षयतः स्वयमेव निवृत्ते तस्मिन्निमित्तेऽन्यपाशनिवृत्तौ ज्ञानक्रियाशक्तिस्तेषां शुद्धत्वात्स्वयमेव मुक्तौ व्यक्तिमेष्यतीति किमीश्वरस्य कर्तृत्वेन । अस्तु तर्हि स्वतन्त्र एव परमेश्वरो मोक्षहेतुः ततो नैष दोषः । नाप्यतिप्रसङ्गः स्वेच्छया नियमितत्वात् । यदाह विद्याधिपतिः । स्वतन्त्रः शक्तिपातोऽसौ शैवः पशुविमोक्षकृत् । सापेक्षत्वे हि तस्य स्यादशक्तः परमेश्वरः' इति । न । तस्यासंभवात् ॥

सत्यां स्थितौ न संहारं
संहारे वा न च स्थितिम् ।
भोगं च कर्महीनस्य
कुरुते न सदेश्वरः ॥ ७० ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्वातन्त्र्ये हि कर्माद्यनपेक्षणादकस्मात्सदैव जगतः सृष्टि-संहारौ कर्महीनस्यापि भोगं दुष्कृतैरपि मोक्षं मुक्तस्यापि संहारमीश्वरः कुर्यादित्युन्मत्तचेष्टावदसमञ्जसं जगद्भवेत् । ततश्च न कश्चिद्भोगाय मोक्षाय दुष्कृतपरिहाराय प्रवर्तेतेति, तदुपदेशशास्त्राणां सर्वेषामानर्थक्याल्लोकायत एवोपास्यो भवतां तस्मादसमञ्जसपरिहाराय कर्मादिपाकसापेक्षः सर्वकर्ताभ्युप-गन्तव्यः । न च तदपेक्षित्वमस्वातन्त्र्यं अपि तु ईश्वरान्त-रायत्तता । सा च तस्य परमेश्वरान्नास्तीति स एव स्वतन्त्रः । सत्यां स्थितौ न संहाराद्यकस्माद्भोगादिकं च कर्महीनादेर्न कदाचित् करोतीति सापेक्ष एव शक्तिपात इति । यद्येवं कर्मसाम्यापेक्षो भविष्यतीति । न । यथाभोगं कर्महीनस्य-कुरुते न सदेश्वरः तथा मलपरिणतिहीनस्य । न च मोक्षं मलपरिणत्यपेक्षित्वान्मोक्षस्य । अन्यथा मलकल्पनानर्थ-क्यात् । साधितं चात्मनां कर्मव्यतिरेकेण मलोऽस्तीति प्राक्-भोगप्रकरणे 'मलापरिणतेः कर्मक्षयाच्च विज्ञानकेवलितैव तेषामिति' । तस्मादवश्यं मलपरिपाक एव शक्तिपाते कारणं वाच्यम् । ननु स च मलः परिपाकात् स्वयमेव निवर्तमानः पुंसां मोक्षकारणं भविष्यतीति नार्थस्तत्र शिवशक्तिनिपात कल्पनयेत्युक्तमेव । तदयुक्तं यतः ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

चेतनाचेतनास्सर्वे
वश्यास्तस्येति निश्चितम् ।
प्रवृत्तौ वा निवृत्तौ वा
तेषां हेतुरतो हि सः ॥ ७१ ॥

विदार्य शक्तिशूलेन
पाशजालमणोः शिवः ।
सर्वज्ञानक्रियारूपं
व्यनक्ति द्विविधं मलम् ॥ ७२ ॥

जडस्य स्वतः प्रवृत्तौ निवृत्तौ वा सामर्थ्यं नास्तीत्युक्तम् । अतः परिपक्वोऽपि मलो द्रव्यत्वात् पटलादिवद्बुद्धिमत्कर्तृ निवर्त्य एवेति ईश्वर एव तन्निवृत्तिपूर्वं पुंसां सर्वज्ञत्वादिरूपं व्यञ्जयन् मोक्षहेतुर्नापर इति । अधुना तु तेषामीश्वरस्सर्वेषां किं साक्षान्मोक्षहेतुरुत केषांचित् व्यवधानेनेति । रुरुसिद्धान्त-संसिद्धः क्रमोऽत्र कथ्यते ॥

निष्कलान् सकलानष्टौ
सर्गादाविच्छया पतिः ।
मन्त्रेश्वराननन्तादी-
ननुगृह्णाति पुद्गलान् ॥ ७३ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

सर्गारंभ एवाष्टावणून् अकलान् परिपक्वमलविच्छेदपूर्वकं सर्वज्ञानक्रियाभिव्यक्तिलक्षणेन मोक्षेणानुगृह्य साक्षात् भगवान् अनन्तादिसंज्ञकान् विद्येश्वरान् करोतीति अणुपक्ष एव विद्येश्वरादिविषयो न शक्तिशंभुपक्षाविति बोद्धव्यम् । अतोऽनन्तरम् ।

कोटिसप्तकसंख्याकान्
निष्कळान् सकळानणून् ।
सर्वज्ञानक्रियाव्यक्त्या
मन्त्रानीशः करोत्यतः ॥ ७४ ॥

तथाभूतानेवाणून् सप्तकोटिसंख्यायुक्तान् तथैव साक्षादनुगृह्य भगवान् मन्त्रान् विदधाति । मन्त्रमन्त्रेश्वराणां मुक्तत्वाविंक शिवसमत्वमेव । नेत्याह—

रुद्रशक्तेस्तु जन्यत्वा-
त्प्रेर्यत्वाचाप्यधास्त्विदम् ।
मन्त्रमन्त्रेश्वराख्यान-
माख्यातं तत्त्वयोर्द्वयम् ॥ ७५ ॥

रुद्रस्य भगवतश्शक्तिर्वामा ज्येष्ठा च रौद्रीचेति । तस्याश्शक्तेरधो विद्याविद्येश्वरलक्षणमेतत्तत्त्वयोर्द्वयं वेदितव्यम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यतस्तयोत्पाद्य स्वाधिकारे प्रेर्यत इत्याख्यातं शास्त्रे—'शिवेच्छाविधिचोदितामिति । प्रेर्यत्वाच्चैषां सर्वज्ञत्वेऽप्यधिकारमलयोगतः परमेश्वरापेक्षया क्रियाशक्तिः क्रमेणांशेन न्यूनेति । 'विद्याविद्येशत्वं चापरमुक्तिः परेह शिवसमतेति' तत्वसंग्रहादावुक्तं अस्माच्च न्यूनत्वात् एषां शक्तितत्वादधोभावो, न तु देशकृतः व्यापकत्वादात्मनाम् ॥ अत एव—

मायोर्ध्वं निष्कलत्वाद्यं
मायोपर्यधिकारतः ।
तदेव प्रक्रियाशास्त्रे
दीक्षार्थं चिन्त्यते बुधैः ॥ ७६ ॥

व्यापकमेतत्तत्त्वद्वयं मायोपर्यधिकारतः कलादिकार्यकरणवर्जितत्वाच्चाध्वशास्त्रे मायोपरि चिन्त्यत्वेन पठ्यते । तथैव

सर्वे चावरजाः प्रेर्याः
पेरका ह्यग्रजाश्च ये ।
पतयोऽपतयो मन्त्रा
ऊर्ध्वं मन्त्रेश्वरा मताः ॥ ७७ ॥

मन्त्रपतित्वान्मन्त्रेभ्यः पूर्वमुत्पन्नत्वाच्चानन्तादिविद्येशानान्तेभ्य ऊर्ध्वं उपरिभावो मन्तव्यः । तत्प्रेर्यत्वेन ततः

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

क्रियाशक्तेर्न्यूनत्वं त्वधोभावान्मन्त्राणां ततोऽनन्तरम् ॥

कलाः सृष्ट्वा महेशान-
स्ताभिः संयोज्य पुद्गलान् ।
अनुगृह्णाति मन्त्रेशान्
मायागर्भाधिकारिणः ॥ ७८ ॥

विद्येश्वराणामाधिष्ठानेन मायातः कलादितत्त्वभुवनपिण्ड-भावसृष्टिं सर्वां कृत्वा ताभिः पुद्गलान् कर्मानुसारेण संयोज्य तेषां मध्यात्परिणतमलानणून् मायागर्भाधिकारिविद्येश्वरत्वे न साक्षाद्भगवाननुगृह्णाति । किमभिधानान् किं संख्यातान् तानित्याह—

मण्डलाधिपतीनष्टौ
क्रोधेशाद्यष्टकं तथा ।
इच्छया शतरुद्रांश्च
वीरभद्रपुरस्सरान् ॥ ७९ ॥

क्रोधेश आदौ यस्याष्टकस्य श्रीकण्ठसाहितस्य तथा । तत्त्वसङ्ग्रहे 'मण्डलिनः श्रीकण्ठः क्रोधाद्या इत्युक्तम् । एव-मष्टादशाधिकशतमेषां रुद्राणामनुगृह्णाति ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अनुग्रहाय जन्तूनां
मन्त्राणां हि प्रयोजकाः ।
एते मन्त्रेश्वरास्तस्मा-
न्न मन्त्रोर्ध्वव्यवस्थितेः ॥ ८० ॥

इत्थं मन्त्रमन्त्रेश्वरयोः पश्चादुत्पत्तेर्मायागर्भाधिकारित्वादधोभावेऽप्येषामाचार्यादिवत्परत्वनुग्रहाय मन्त्रप्रयोजकत्वान्मन्त्रेश्वरत्वम् । न त्वनन्तादीनामिव मन्त्रेभ्य ऊर्ध्वं स्थितत्वात् । किं च,

अग्रजा निष्कला मन्त्रा
एते चैतद्विलक्षणाः ।
मन्त्रतत्त्वादधस्तस्मा-
न्मायागर्भाधिकारिणः ॥ ८१ ॥

मन्त्राणां निष्कलत्वेनोक्तत्वादेषां तु सकलत्वात्तेभ्योऽपि न्यूनशक्तित्वेनाधो मायागर्भ एवाधिकार इत्यधिकारभेदादेवं मन्त्रमन्त्रेश्वरवर्गाः परस्परं शक्तितो भिन्ना एव । न त्वावारिकाः । 'यथा वार्तिककार' आह—परेण रूपेण निर्विशेषाश्चयोऽप्यमी । महाल्पयोनियोगित्वाद्विशिष्यन्ते परस्परमिति । कुत्रैषां वीरभद्रादीनामध्वनि स्थितिरित्युच्यते ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

मायागर्भाधिकारित्वा-
त्सकलत्वाच्च शासने ।
मायातत्त्वादधस्तस्मा-
च्छिवशक्तिसमन्विताः ॥ ८२ ॥

यत्तेषां मायागर्भाधिकारः सकलत्वं चोक्तम् । ततो ब्रह्मादिवन्मायातत्त्वादधः कलादिभुवनेष्ववस्थितिः । ननु सकलत्वादेषां कलादिसंकोचितदृक्क्रियत्वात्पशुवत्कथं मायागर्भाधिकारे शिवशक्तिसमन्वितत्वमिति । उच्यते ।

कलायोगेऽपि नो वश्याः
कलानां पशुसङ्घवत् ।
वश्यास्ताः पशुभिः सार्धं
तेषां ते तदुपर्यतः ॥ ८३ ॥

यतस्तेषां कलादीनां
क्रमेणोपर्यवस्थिताः ।

यतस्तेषां पशुभिः सार्धं ताः कलाः प्रेर्यत्वाद्वश्याः तस्माच्च कलादियोगेऽपि कलावश्यत्वमेषामिति सर्वज्ञता मायागर्भाधिकारश्चाविरुद्ध इति ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मन्त्रैः सार्धं तदीशानां
परेषामपरैः सह ॥ ८४ ॥

आविर्भवत्यधीकारः
स्वशक्तिव्यक्त्यनन्तरम् ।

मन्त्रेश्वराणां चानन्तादीनां परेषां क्रोधादीनामपरेषां वीरभद्रादीनां च यदैवेश्वरेण पाशविच्छेदपूर्वं ज्ञानक्रियाशक्तिरनुरूपाऽभिव्यञ्जिताऽऽसीत् । तदैवानुरूपमधिकारं करोति न कालान्तरं प्रतीक्षते । मन्त्राणां तु—

मायाबन्धविमोक्षाय
कारणादात्मनो व्यधात् ।
मन्त्रकोट्योऽभवन् सप्त
सप्तेति नियमः श्रुतेः ॥ ८५ ॥

कालान्तरेण तेषां कार्यकरणमिति भेदः । स तेषामधिकारः किं नित्य एव । नेत्युच्यते—

मन्त्राणां मन्त्रनाथानां
कृतार्थानामपीदृशाम् ।
व्यापारपरतन्त्राणा-
मधिकारस्तु सावधिः ॥ ८६ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कृतार्थानां मुक्तानामप्येषां पशुवत् व्यापारपरतन्त्रत्वाद्वक्ष्यमाणावध्यन्तोऽधिकारः ॥ अधुनाऽनन्तादीनामपि परस्परं प्रधानाप्रधानभावः कथ्यते ॥

सूक्ष्मादिनायकोऽनन्तः
स तद्युक्तश्शिवेरितः ।
उत्पत्तिस्थितिसंहार-
संरोधानुग्रहार्थकृत् ॥ ८७ ॥

यथा किलानन्तः शिवात्कलया क्रियाशक्त्या न्यूनः स्थित्यादीनि कर्माणि शिवाधिष्ठितः करोत्येवमनन्तात्सूक्ष्मः "तेषामनन्तः परमेश्वर इति श्रुतेः" । तथा सूक्ष्माच्छिवोत्तम इत्यादि सर्वेषां पूर्वपूर्वापेक्षया न्यूनत्वं बोद्धव्यम् । अधुना मन्त्राणामधिकारकालः परस्परं वैलक्षण्यं चोच्यते ।

मन्त्राणां पूर्वमर्धं तु
कृतात्सर्गादनन्तरम् ।
अधिकारस्य वैचित्र्या-
दनुगृह्य भवेरितम् ॥ ८८ ॥

तत्कालमाद्दतान् पुंसः
कारणानुग्रहेच्छया ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

कृत्वाधिकारमायाति
शिवसायुज्यमच्युतम् ॥ ८९ ॥

सप्तकोटिसंख्यातानां मन्त्राणां पूर्वं प्रकृष्टमर्धसतीव परिपक्वमलत्वाज्जन्मव्याध्याद्युपहतं संसारमवलोक्य तत्संसर्गं पशुप्रयोज्यतां चात्मनः सोढुमक्षमा वयमितीश्वरं विज्ञाप्य तत्प्रेरणयैव विद्येश्वरनियोगमप्यनपेक्ष्य शिवशक्त्या समाहृतानणूंस्तत्कालमेव साक्षात्तत्तत्कर्तृतयैव तद्धिया च तत्करणतया चानुगृह्य विचित्रमधिकारं कृत्वा परां मुक्तिं शिवसमत्वं गतं । द्वितीयस्यार्धस्य कावार्तेत्युच्यते—

शिवोऽवशिष्टमन्त्राणां
परिवाराङ्गशंबरान् ।
सिद्धिमुक्तिप्रसिद्ध्यर्थं
मण्डलानि च सृष्टवान् ॥ ९० ॥

अथ शिष्टस्यार्थस्य प्रवृत्त्यर्थं परमेश्वरोऽणुपरिवारकमण्वन्तरं हृदयाद्यङ्गं शक्तियोगं च शंबरांश्च तद्वाचकान् शब्दान् मण्डलानि च पूजास्थानानि नवनाभादीनि लोकानां हितार्थमकार्षीत् । अथैषां मन्त्राणां पूर्वेषामिव किमनुग्रहे कर्तृत्वमेव । नेत्युच्यते—

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

ते मन्त्राः सहितास्तैस्तु
परिवाराङ्गशंवरैः ।
विमुञ्चन्तीतरान्नुन्ना
देशिकस्थेन शंभुना ॥ ९१ ॥

एतेषां परिवारादियुक्तानां दीक्षादावाचार्याधिकरणेश्वरप्रयोज्यत्वादनुग्रहकरणत्वं सदैव न कर्तृता ।

अधस्स्वभुवनाच्चैषां
मन्त्रेशा भोगमोक्षदाः ।
स्वं स्वं ददाति जन्तूना-
मीशशक्तिप्रचोदिताः ॥ ९२ ॥

शेषास्त्वप्रधानाः विद्येशा वीरभद्ररुद्रादयः । भुवनेभ्य ऊर्ध्वं शास्त्रविहितेभ्यो यज्जन्तूनां स्वभुवने च केषांचिद्ब्रह्मविष्ण्वादीनामनुग्रहं च कुर्वन्तीति तत्कर्तारो नानन्तादिवद्भुवनसर्गादिकर्तारः । मन्त्रमन्त्रेश्वराणामधिकारावधिः प्रतिज्ञात उच्यते—

अमी रुद्रास्तु सूक्ष्माद्या
मन्त्राश्च शिवतुल्यताम् ।
सानन्तास्स्वाधिकारान्ते
यान्ति मुक्तिं हरेरणात् ॥ ९३ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

अत्र सूक्ष्मादीनां च मन्त्राणां च तदीशानानामपि वीर-भद्रादीनामनन्तोपरमकाल एव सर्वेषां युगपच्छिवसमता परा मुक्तिः। यच्छ्रूयते। 'अनन्तो परमे तेषां महतां चक्र-वर्तिनाम्' विहितं सर्वकर्तृत्वकारणं परमं पदम्' इति। अत एव न तु क्रमेण। यथा वार्तिककार आह— 'अन-न्तो परमे स्थानं तत्तु सूक्ष्मोऽधितिष्ठति। पदात्पदं विचरतो ह्येकैकस्य महात्मनः' स्थाने शिखण्डिनस्त्वन्यं रुद्राणां कुरुते शिव इति। अथानन्तस्य कदोपरम इत्युच्यते।

सृष्ट्यादिपञ्चकर्माणि
कृत्वानन्तेश्वरस्ततः।
पारतन्त्र्याद्विनिर्मुक्तः
प्राप्नोति पतितुल्यताम्॥ ९४॥

यदाऽनन्तेनैकस्मिन् मायासर्गे पञ्चकर्माणि मायासंबन्धि सृष्ट्यादिपञ्चकर्म निर्वर्तितं भवति तदा मायाकार्यस्याखिल-स्योपसंहृतत्वात् कृतप्रयोजनोऽनन्तो महाप्रलयोपक्रम एव पतिसमत्वं परां मुक्तिं गच्छतीति। यद्येवमनन्तादीनामुप-संहृतत्वान्मायातः सर्गान्तराणि कथं भगवान् करोतीत्यु-च्यते—

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

एवं सर्गेष्वतीतेषु
भविष्यत्सु च शङ्करः ।
पुंसो मोचितवानन्यान्
मोचयिष्यन्ति चापरान् ॥ ९५ ॥

प्रतिसर्गं पूर्वानेवानन्तादीन् कृत्वा पुंसां भोगं निर्वर्त्य भगवान् मोक्षं करोतीत्यर्थः । तदेवम् ।

आचार्यसंस्थितो देवो
दीक्षाशक्त्यैव मुञ्चति ।
स्वशक्त्योपहृतान् पुंसो
मन्त्रसाधनसाध्यया ॥ ९६ ॥

परमेश एव आचार्यस्थो मन्त्रमन्त्रेशव्यतिरिक्तान् दीक्षयैव मन्त्रसाध्यया परिपक्वमलान् पुंसो मोचयतीत्युक्तम् । न ज्ञानादिनेति पूर्वप्रतिज्ञातस्सर्वोऽर्थो निर्णीतः । यद्येवं मायांजनोत्तरकालं हृतानां कथं मोक्षः तेषामप्याचार्योऽधिकरणो भगवानेव दीक्षां करोति । प्रतिभुवनं गुरूणां संभवात् । तथा हि—

मन्त्रेशा गुरवः पूर्वे
रुद्रा देवा मुनीश्वराः ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

मन्त्रेशैश्शासिता रुद्रा
रुद्रैर्देवास्सुशासिताः ॥ १७ ॥

देवैर्मुनीश्वराश्चात्र
मुनिमर्त्या मुनीश्वरैः ।
मनुष्यैर्मानुषास्तद्व-
द्वर्णसंस्था द्विजोत्तमैः ॥ १८ ।

रुद्राः श्रीकण्ठादयोऽत्र एवं गुरूणां संभवात्तत्तत्कर्तृतयैव सर्वत्र दीक्षया मोक्षः । वर्णसंस्था द्विजोत्तमैरित्युक्तं साध्यते ।

दीक्षायां साधकत्वे च
चतुर्णां वर्णिनामिह ।
अधिकारो गुरुत्वेन
ब्राह्मणस्यैव कीर्तितः ॥ १९ ॥

साधकदीक्षादौ ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चेति श्रूयते । अतश्चतुर्णामप्यत्राधिकारः । गुरुत्वे तु 'अथाचार्यवरः श्रीमानग्रजन्मा सुपेशल' इति श्रुतेः । ब्राह्मणस्यैव ब्राह्मणोऽपि न सर्वो गुरुः । किं तु,

शक्त्यधिष्ठयनिष्पाद्य
सहितं दीक्षितश्शिवम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यो वेत्त्येव नियुक्तः सन्
गुरुणा गौरवे गुरुः ॥ १०० ॥

यो दीक्षितः परमेश्वरस्यैता ज्ञानादयः शक्तयोऽनाश्रिताद्यं कालाग्निरुद्रभुवनान्तं सर्वं तत्त्वभुवनभूतभावाद्यमेतदधिष्ठेयमेतच्च निष्पाद्यं पशूनां भोगमोक्षाविल्येवं परमेश्वरं संहिताभ्योऽवगत्य पदवाक्यप्रमाणैस्तद्विषयमिथ्याज्ञानव्युदासेन निश्चितं वेत्ति तमेव आत्मान्तरपारिग्रहाय दीक्षायामर्चाकरणोपयोगाय च भावयति । स ज्ञाननिष्ठो गुरुणा गुरुत्वे नियुक्तः सन् गुरुर्नान्यः यदुक्तं 'नाज्ञो भ्रान्तः ससन्देहो गुरुर्भावविवर्जितः नातत्त्वविदनभ्यस्तकर्ममार्गोऽपि नो मतः' इति । अथ दीक्षितैः किं बुध्युपारूढः सर्वेश्वरो ज्ञातव्यः तदनुपारूढो वा तत्र,

बुद्धिर्बोधप्रकाश्यत्वं
शिवस्यान्यैस्समीहितम् ।
शैवमानमविन्दद्भिः
पशुमानानुवासितैः ॥ १०१ ॥

बुद्ध्युपारूढा एवार्थास्सर्वदा पुरुषेण चेत्यन्ते । न तदनुपारूढाः बुद्ध्यादीनामानर्थक्यप्रसङ्गात् । परमेश्वरोऽपि भिन्न एव तस्याश्चेत्यत इति बुद्ध्युपारूढ एव चेत्यो नान्यथा

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

केवल: तथा हि । धर्मादीश्वरप्रसादत: कस्यचिद्रजस्तमोमलं परिहृत्य निर्मलतरसत्वबृत्तिरेव बुद्धिर्भवति तत्र परमेश्वर: प्रतिबिम्बवद्वर्तत इति तेनैव चेत्यो नान्येनेति केचित्साङ्ख्य-हष्ट्यनुवासिता: तन्न । अनैकान्तिकत्वात् । तथा हि—

आत्माप्यविषयो यस्या
भोक्ता भोग्यत्वत: कथम् ।
स्वप्रकाशमसौ देवं
प्रकाशयति शङ्करम् ॥ १०२ ॥

न हि योऽयश्चेत्यते स सर्वो बुध्युपारूढ एव । बुद्धि-भोक्तृत्वादेवात्मनस्तदनुपारूढस्यापि चेत्यताभावादिति व्याप्त्यासिद्धे: कथं वक्ष्यमाणवत्स्वप्रकाशस्येश्वरस्य बुध्युपारोह: सिध्येत् । ननु पुरुषो बुध्युपारूढ एव चेत्यत इति सांख्या: । तथाहि । कपिलब्राह्मणोऽप्यप्रत्यक्ष: पुरुष इति दर्पणस्थानीयायां बुद्धौ विषयिविषययोर्द्वयोरपि प्रतिबिंबकमेलनं भोग इति बुध्यध्यवसित एव सर्वश्चेत्यत इति । तदप्ययुक्तम् ।

सर्वदोत्पन्नमानोऽसो
पुरुषो नानुभूयते ।
न सोऽस्ति कालो यत्राय-
मन्तस्थेनानुभूयते ॥ १०३ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

बुद्धिस्थेनापि पुरुषप्रतिबिंबेन पुरुषो नावैतीति तत्प्रतिबिंबकल्पनं निष्फलमेव किं च ।

पूर्वापरत्वतो युक्त
मात्मबोधस्य तस्य च ।
उपलभ्योपलब्धृत्वं
तदभावादिदं त्वसत् ॥ १०४ ॥

प्रतिबिंबात्मकत्वादात्मनो विषयत्वं भोग्यता च तद्विषयत्वाच्च बुद्धिबोधस्य भोक्तृत्वप्रसङ्गः । न चैतद्भवद्भिरभ्युपगन्तव्यमित्यसदेतत् बुध्यध्यवसितत्वात्पुरुषोऽपि चेत्यत इति । अपि च ।

परिणामी पुमान् भोग्यः
प्राप्तस्तद्गोचरो यदि ।
विपरीता च बुद्धिः स्या
द्विरोधश्चापि दर्शने ॥ १०५ ॥

इत्थं बुद्धिविषयत्वेन भोग्यत्वाद्विषयवत्पुंसः परिणामितया बुद्धेश्च भोक्तृत्वान्नित्यत्वं प्रसज्यते भवतामिति दर्शनविरोधः । तस्माद्भोक्तृभोगान्यथाऽनुपपत्त्या पुरुषो बुद्ध्यनुपारूढ एव स्वसंवेदनसिद्धोऽभ्युपगन्तव्यः । कथं तर्हि व्यक्ताव्यक्तज्ञसंबुद्धिरित्यादिना प्राक् भोगप्रकरणे सिद्ध्यादि

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

बुद्धिबोधप्रकाश्यः पुमानुक्तः । न प्रकाश्यतया । किं तु कारकत्वेनेत्यविरोधः । व्यक्ताव्यक्तविषये हि बुद्धिबोधे तत्प्रकाशकतयाऽत्यन्तविविक्तः पुरुषस्स्वयमवभासत इत्युक्तम् । 'तदा द्रष्टुस्स्वरूपेऽवस्थानमिति' । अस्त्वेतत् । ईश्वरस्तु वेद्यत्वादादित्यादिवद्बुद्ध्युपारूढ एव वेद्यः । न । असंभवात् । तथा हि—

अन्तःकरणवृत्तिर्या
बोधाख्या सा महेश्वरम् ।
न प्रकाशयितुं शक्ता
पाशत्वान्निगळादिवत् ॥ १०६ ॥

पाशत्वं हि श्रेयोदूरप्रतिरोधकत्वं बुध्यादीनामिति कथं वा शिवात्मकपरश्रेयःप्रकाशकत्वं स्यात् । पाशत्वे वा परिमितत्वं बुद्धेरिति कथं तत्र दिक्कालाद्यपरिमितस्य परमेश्वरस्य खड्गादावभिशुमहादेरिव प्रतिबिंब उपपद्यते । तदेकदेशस्य तु तत्र प्रतिबिंबो भ्रान्तिरेव भगवतोऽनवयवत्वेन एकदेशाभावादित्युक्तं अस्माभिरन्यत्र । 'बुद्धौ मितायां नेशस्य प्रतिबिंबोऽमितत्वतः । खड्गेऽभिशुमतो यद्वत्तदंशस्य त्वसौ भ्रमः' इति । किं च—

Center for Shaiya Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

दाह्याभिभाव्यधर्माणः
पाशास्तेऽतो न शूलिनः ।
दाहाभिभवयोः कर्तुः
प्रकाशायाभिवाञ्छिताः ॥ १०७ ॥

काष्ठैर्दाह्यैर्न दाहस्य
कर्ता वह्निः प्रकाश्यते ।
नाभिभाव्याभिरुल्काभि-
र्दिनकृच्चाभिभावकः ॥ १०८ ॥

दाह्योऽभिभाव्यो वा काष्ठादिरग्न्यादेर्वा दाहाभिभवकर्तुः प्रतिबिम्बग्रहणेन न प्रकाशको दृष्टः । बुद्धिश्च भगवतश्चेत्याभिभाव्या चेति तस्य सा न प्रकाशिका । ननु दर्पणादिभिर्दाह्यैरनैकान्तिकता । अत्र भवतो मूलयुक्तेस्तत्र न दोषः । किं चागमविरोधश्चात्र पक्षे । तथा हि—

विशुद्धेनात्मतत्त्वेन
चैतन्याख्येन सूत्रकृत् ।
शिवशक्तिकले शुद्धे
शिवो ध्येय इति ब्रुवन् ॥ १०९ ॥

पाशागम्यो महेशान
इति ख्यापयति स्म नः ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

दीक्षितैर्ज्ञानशक्त्यैव निर्मलया शिवशक्त्या दीपितया शिवो ध्येय इति रौरवसूत्रकारोऽब्रवीत् । न बुद्ध्यैर्ध्यातव्यो भगवानित्याह— 'सर्वाञ्जनविनिर्मुक्तं शिवशक्तिकलोज्झितम् । आत्मतत्त्वमिदं शुद्धं साधकानां प्रकीर्तितम् । तत्स्थो लीनस्तु तत्त्वेन तां कलां चिन्तयेद्बुध' इति । तदेवम् ।

नध्येयो नापि च ज्ञेय-
स्तस्मादशिोऽणुबन्धनैः ॥ ११० ॥

तस्माद्बुध्यादिभिर्न ज्ञातुं नापि तदेकनिष्ठतया ध्यातुं शिवो दीक्षितैः शक्यते । कथं तर्हि शिवो ज्ञायत इत्युच्यते ।

शिवार्कशक्तिदीधित्या
समर्थीकृतचिद्दृशा ।
शिवं शक्त्यादिभिस्सार्धं
पश्यत्यात्मा गतावृतिः ॥ १११ ॥

यथाऽर्कोपकृतेन चक्षुषा लोकोऽर्थं पश्यति एवं परमे-श्वरानुग्रहान्निवृत्तावरणयोपचित[illegible] च ज्ञानशक्त्यैव तदनुगृहीतैर्भक्तैस्तज्ज्ञाननिष्ठैः परमेश्वरो दृश्यते । किं घटा-दिवत्कर्मतया न द्रष्टृद्रष्टव्ययोर्द्वयोरपि व्यापकत्वेन तथा दर्शनासंभवात् । इत्थम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पाशानाप्ये शिवे शब्दा-
योगसाधनचेष्टितात् ।
सकलाणोऽशिवज्ञानं
दृश्यते तत्कथं भवेत् ॥ ११२ ॥

पाशागम्यत्वे भगवतः कथं शास्त्रात् प्रतिपत्तिर्दीक्षितात्मनां शब्दस्याकाशवायुहेतुत्वेन पाशत्वात्कथं ततस्तत्प्रतिपत्तिः । अत्रोच्यते ।

मन्त्रतन्त्रात्मके शब्दे
शिवो व्यक्तः कलासु च ।
समर्थयति चिच्चक्षु-
र्नातः किंचिद्विरुध्यते ॥ ११३ ॥

सर्वत्र सर्वदाऽधिष्ठानाद्भगवान् सर्वैः सहित एवेति यथा क्वचिल्लिङ्गे [illegible] आचार्यादौ चानुग्राहकत्वेन विशेष-[illegible]ाभिव्यक्त उच्यते । अत एव पूजानमस्कारादयः तत्र [illegible] फलोदया भवन्ति । नान्यत्र तद्वत्सूक्ष्मेऽपि [illegible] मन्त्रतन्त्रात्मशब्दे तत्कलासु नादबिन्द्वाद्यासु [illegible]नाभिव्यक्तौ तन्त्रं समर्थयन् स्वात्मानं पुंसां दर्शयतीत्यपूर्वमिदं मन्त्राणामभिधायकत्वं घटाद्यभिधायकेभ्य इत्युक्तमस्माभिः मन्त्रवार्तिकटयाम् । तथाहि ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

व्यक्तः शिवोऽणुबन्धेषु
बन्धकार्यविलक्षणात्
गम्यते कार्यतः ख्याता-
द्व्यक्तो देहे ग्रहो यथा ॥ ११४ ॥

यथाहि । मनुष्याणां केषांचिच्छरीरं देवताऽधिष्ठितं अविसंवादि त्रिकालवस्तूपदेशाज्ज्ञायते । तथैव मन्त्रशब्दोच्चारणात्तल्लिप्यक्षरविन्यासाच्च शब्दमात्रासंभविनो वश्यादेर्विलक्षणस्य कार्यस्य दर्शनात् तत्रभवानभिव्यक्तः प्रतिमादाविव गम्यते । अत्र ;

अणुबन्धेषु सर्वेषु
स्वपरात्मप्रकाशकः ।
भवः प्रकाशशून्येषु
व्यज्यते कथमुच्यते ॥ ११५ ॥

न जडे चिद्रूपस्याभिव्यक्तिरुपपद्यत इत्यर्थः । नैष दोषः ।

दीपस्तैलादिके दाह्ये
दाहको व्यज्यते यथा ।
स्वपरात्मप्रकाशोऽयं
निष्प्रकाशेषु चिद्वताम् ॥ ११६ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

दीपस्योपलक्षणत्वाद्यथा जडेऽपि मनुष्यादिशरीरे स्वपरात्मप्रकाशको व्यापकश्चात्मा चिद्रूतामप्येषां मनुष्यादीनामुपकाराय कर्मानुरूपमभिव्यज्यते। तथैव परमेश्वरः प्रतिमादिषु चित्रादिषु मन्त्रशब्देषु च पशूपकाराय विशेषसान्निधानोऽभिव्यज्यत इत्यदोषः। दीक्षितानामित्थं ज्ञानादस्य पाशस्य नाशः। कदा शिवतुल्यत्वं* शक्तिरित्युच्यते।

प्राप्नुतश्शिवतुल्यत्वं
तन्वन्ते गुरुदीक्षितौ।

अनारब्धकार्याणामेव कर्मणां दीक्षया क्षयः नारब्धकार्याणाम्। यच्छ्रूयते—'दीक्षिताः परमं शान्तं प्रविशन्ति तनुक्षय' इति। तेषां तु सद्योनिर्वाणदीक्षयैव क्षयः। न भोगास्तथैव।

भोगान्ते साधकस्सिद्धिं
तथैव प्राप्नुयाद्ध्रुवम् ॥ ११७ ॥

यच्छ्रूयते "भुक्त्वा भोगान् सुचिरममरस्त्रीनिकायैरुपेताः स्तस्तोत्कण्ठाश्शिवपदपरैश्वर्यभाजो भवन्ति" इति। उक्तरससाधनो मोक्ष इति। अधुना त्वेतान्निर्णये परमुक्तिनिरासः।

---

* मित्युच्यते।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

तत्र महाव्रतः ।

सिद्धानां शिवतुल्यत्वे
कारणानेकता भवेत् ।
तेषामतुल्यबुद्धित्वा-
त्कार्यं नोत्पत्तुमर्हति ॥ ११८ ॥

मुक्तानामपीश्वरवत्सर्वकर्तृत्वे नवमिदमस्तु पुराणमस्त्विवति विभिन्नमतित्वात्सर्वकार्यानुत्पादप्रसङ्ग इति मुक्तानां सर्वज्ञतैव । सर्वकर्तृता च परमेश्वरस्यैवेत्यभ्युपगन्तव्यं इति । नैषदोषः ।

रागद्वेषादियुक्तत्वा-
दतुल्यज्ञानता नृणाम् ।
तेषामतुल्यबुद्धित्वा-
त्कामभेदो न दुर्लभः ॥ ११९ ॥

युक्त एवं पतीनां* रागादियोगेन पक्षग्रहदभिप्रायभेदः । सिद्धास्तु ।

रागादिदोषनिर्मुक्ता-
स्सर्वगोचरबुद्धयः ।
सिद्धास्तेऽतो न कामैस्तु
भेदवद्भिस्समन्विताः ॥ १२० ॥

*पशूनामित्यपिवास्तु

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

अविभिन्नाधिकारास्ते
शिवेनोक्तास्तु सूरिभिः ।
तेनेह सर्वकार्याणा-
मुत्पात्तिर्न विरुध्यते ॥ १२१ ॥

यतस्ते सिद्धत्वादेव रागादिरहिताः यथावत्सर्वविषयज्ञातारः शिवेन सहाविभिन्नाधिकारास्सर्वकर्तृत्वाच्च ततस्तेषां पक्षप्रहासंभवान्नाभिप्रायभेद इति न कार्यानुत्पाददोषप्रसङ्गोऽत्र । महाव्रतपक्षे त्वमुक्तिरेव । यतः ॥

असर्वकर्तृभावेन
सर्वज्ञो मुक्त इत्यसत् ।
न्यूनत्वान्न च सार्वज्ञ-
मकर्तृत्वात्पशुर्यथा ॥ १२२ ॥

परा परिपूर्णता हि मुक्तिः असर्वज्ञभावश्च प्राप्तः । सर्वकर्तृत्वाभावात् पशुवद्भवेन्मुक्त इति ।

चिद्व्यक्त्या सर्वकर्तृत्वं
सिद्धानामीश्वरो यथा ।
अन्यथा कर्तृता न स्या-
दीश्वरस्याऽपि सिद्धवत् ॥ १२३ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

([1]चिद्व्यक्त्या सर्वकर्तृत्वमस्त्येव । तथा सिद्धानां सर्वकर्तृत्वं यथा सिद्ध्यति ईश्वरोऽपि सर्वज्ञत्वादस्य सर्वकर्तृता) । [2]अन्यथा न स्यादिति विश्वानुत्पादप्रसङ्गः । अपिच ।

न कर्तृशक्तेश्चिद्व्यक्ति-
रेकनाशे सयुक्तिका ।

सा शक्तिरेकैव ज्ञानक्रियेत्युक्तं प्राक् । न च तस्याश्चिदंशेन व्यक्तिः । क्रियांशेनाव्यक्तिर्युज्यते । निरंशत्वात् । न च विद्येश्वरशक्तिव्यक्तिभिर्व्यभिचारः । सर्वदा तासां व्यक्त्यभावात् । अथ सांख्यवत्पुरुषाणां कर्तृत्वं प्रागपि नास्तीत्युच्यते तदप्ययुक्तम् ।

कर्तृत्वस्य न चाभाव-
स्साधितत्वात्ततस्त्वसौ ॥ १२४ ॥
सर्वज्ञानक्रियाहीनो
निष्कलः केवली पशुः ।

---

1 यथा ईश्वरस्य चिद्व्यक्त्या सर्वकर्तृत्वमस्ति तथा सिद्धानामपि चिद्व्यक्त्या सर्वकर्तृत्वं संभवत्येव ।

2 अन्यथा ईश्वरस्यापि सर्वकर्तृता न स्यादिति विश्वानुत्पादप्रसङ्गः । इति पाठश्चेत्साधुः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

कर्तृत्वं प्राक् भोगप्रकरणे साधितमिति तदनभिव्यक्तावेकत्वाच्छक्तेर्ज्ञत्वस्याप्यनभिव्यक्तिरिति सर्वज्ञानक्रियावैकल्येन पशुरेव भवेन्मुक्त इति । अत्र पुनः परः ।

व्यज्यते कर्तृता सिद्धे
सर्वत्र ज्ञानवन्न च ॥ १२५ ॥
अस्तीशस्सर्वकर्तेति
संचिन्त्य करणीयकृत् ।

सिद्धे यत्कर्तृत्वं तन्न ज्ञानवत्सर्वत्र सर्वकर्ताऽस्तीति किमधिकं मया कर्तव्यमिति संचिन्त्य सिद्धो न करणीयं करोतीति यद्येवम् ।

सिद्धे व्यक्ता पशौ नेति
विशेषः कस्तयोर्यदि ॥ १२६ ॥
सर्वकार्याणि नो कुर्या-
त्सिद्धस्था सर्वकर्तृता ।

—यदि व्यक्तमपि सिद्धस्य कर्तृत्वं न कार्यकरं । तर्हि अव्यक्तात्पशुकर्तृत्वात्तस्य को विशेषः । तथा हि ।

प्रवृत्तिस्सर्वनिष्पत्तौ
व्यक्तिर्नान्या तु तद्गता ॥ १२७ ॥

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

ज्ञानं सर्वप्रकाशाय
प्रवृत्तं व्यक्तमुच्यते ॥

इयमेव त्वस्य कर्तृत्वस्य पशुविलक्षणा व्यक्तिः या ज्ञानवत्तस्य सर्वप्रवृत्तिः तदेवम् ।

सर्वकृत्यप्रवृत्तौ वा
नासावस्तीति वर्ण्यताम् ॥ १२४ ।
गृह्यतां दृङ्निरोधो
वा दोषो वा पूर्वमोक्षगः ।

व्यक्ता चेत्सिद्धस्य क्रियाशक्तिस्सर्वकार्यक्षमैवाभ्युपगन्तव्या अथ व्यक्ताऽपि कार्यं न करोति । यद्येवं प्रतिबिंबगर्भाणुशक्तिवन्नास्त्येव सा तस्येति वाच्यं अथाव्यक्ता विद्यत इत्युच्यते तर्ह्येकत्वात्ज्ञानक्रिययोश्शक्त्योर्दृङ्निरोधो ज्ञानस्याऽनभिव्यक्तिर्मोक्षो वाच्यः । अथाव्यक्तयापि तया ज्ञानशक्तिर्व्यक्तेष्यते यद्येवमविद्यमानपूर्वो मोक्षो यस्य परमशिवस्य तस्मिन् सर्वज्ञत्वान्मुक्तवदकर्तृत्वदोषः प्रोक्तोऽभ्युपगन्तव्यः इति पक्षाणां चतुष्टयादस्माद्भवद्भिरेको ग्राह्यः न च प्रथमपक्षस्यात्र कश्चिद्दोष इति शिवसमत्वं सर्वज्ञत्वसर्वकर्तृत्वलक्षणैव मुक्तिरभ्युपगन्तव्या । पाशुपतास्तु मुक्तावी-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

श्वरगुणानां सङ्क्रान्तितः सिद्धानां शिवसमतामाचक्षीरन् तदयुक्तम् ।

विमोक्षे गुणसंक्रान्ता
वीशोऽनीश्वरतां व्रजेत् ॥ १२९ ॥
गुणखण्डस्य संक्रान्तौ
गुणस्सावयवो भवेत् ।

सिद्ध एवेश्वरगुणानां सङ्क्रान्ताविष्यमाणायामीश्वरस्सर्वज्ञत्वादिगुणरहितस्स्यात् । गुणानामनंशत्वादेकदेशेन गुणसङ्क्रान्त्यसंभवात् । किंच ।

त्यक्त्वा स्वगुणिनं यान्ति
न च गुण्यन्तरं गुणाः ॥ १३० ॥
गच्छतां च व्यवस्थेयं
पदार्थानां विरुध्यते ।

यदि च स्वगुणित्यागेन गुण्यन्तरे गुणानां वृत्तिरिष्येत तदा सर्वस्सर्वगुणी स्यादिति दृष्टनियमानुपपत्तेर्मुक्तोऽप्यमुक्तोऽमुक्तश्च मुक्तः प्रसज्यत इति गुणसङ्क्रान्त्यनुपपत्तेर्न तथा शिवसमत्वमभ्युपगन्तव्यमिति। वेदान्तविदस्तु तल्लयात्तत्समत्वं मुक्तिं प्रतिपन्नाः तदप्ययुक्तम् । यतः ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

प्रागुक्तदोषदुष्टात्मा
परमात्मा यथा तथा ॥ १३१ ॥
सिद्धस्तल्लयसंप्राप्त-
स्तदभिन्नो यतस्त्वसौ ।

उपादानकारणत्वात्परमात्मनोऽचेतनत्वादिदोषदुष्टत्वं यत्प्राक् प्रतिपादितं तत्सिद्धस्याऽपि तदभेदात्प्रसज्यत इति अद्वैतमेव मोक्षो भवतां । अपि च ।

एकत्वदर्शनं मुक्तेः
साधनं स्वात्मबाधितम् ॥ १३२ ॥
मोच्यमोचनकर्तॄणां
नाभेदे सा यतो भवेत् ।

एकमेवाद्वितीयं ब्रह्मैव सत्यम् । ततस्तत्ज्ञानमेव मुक्तेस्साधनमितीदमुच्यमानं माता मे वन्ध्येतिवत्स्वोक्त्यैव बाधितम् । यत एकत्वे सति न साध्यसाधनभावः साध्यसाधनभावे वाऽनेकत्वमिति । किंच ।

भेदे सति प्रमाणानां
प्रवृत्तिर्नान्यथा मता ॥ १३३ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कलहः किमिति विद्वद्भि-
रभेदो निष्प्रमाणकः ।

ब्रह्मैव सत्यमिति येन प्रमाणेन सिद्धं भवतां तद्यदि असत्यमेव कथं तस्मात्स्वप्नदृष्टादिवत्सत्यब्रह्मसिद्धिः । अथ सत्यं तर्हि प्रमाणप्रमातृप्रमेयप्रमितिसत्यत्वादद्वैतमसत्यमिति कथं तत्प्राप्तिरपि मोक्षः । सांख्यास्तु ।

मुक्त्वा योगफलं रम्यं
भोगान् सांसारिकानपि ॥ १३४ ॥
आचैतन्यं कथं चान्ये
कैवल्यं मोक्षमूचिरे ।

योगस्सादाशिवो देहः तल्लक्षणं फलं सर्वज्ञतादिरूपं मोक्षं परित्यज्य संसारभोगांश्च नानाविधविषयसंवेदनफलानणिमादिसाध्यांस्त्यक्त्वा कैवल्यलोभेन प्रकृतिवियोगादात्मनाशसमं ज्ञत्वमेव स्वेषां मोक्षं कल्पितवन्तः । न च तस्मिन्नपुरुषार्थभूते कस्यचित्प्रवृत्तिरुपपद्यते । तथा हि

स्वचैतन्यविनाशाय
सन्तस्सन्तः कथं च ते ॥ १३५ ॥

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

विवेकदर्शनाभ्यास-
प्रयासं कुर्वतेऽन्वहम् ॥

के हि पण्डितास्स्वात्मनो ज्ञाननाशाय प्रत्यहं ज्ञानयोगाभ्यासादिप्रयासं कुर्युः। किं च।

विवेको नाम वैधर्म्या-
द्गुणानां पुरुषस्य च।
तत्र यद्दर्शनं तत्तु
विचारे नोपपद्यते ॥ १३६ ॥

न च गुणपुरुषविषयं ज्ञानं विचारे क्रियमाणे सांख्यानामुपपद्यते; तथाहि गुणा वा पुरुषविवेकं दर्शयन्ति स्वयमेव वा पुरुषः पश्यति। तत्र।

कर्तृप्रसवसंकीर्ण-
धर्मका हि गुणा वयम्।
त्वं नेति पुरुषस्यार्थं
बुद्धिस्था दर्शयन्ति ते ॥ १३७ ॥

चिच्छक्तिरपरिणामिनी अप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता चेति बुद्धिदर्शितविषयत्वेनैव पुरुषस्याभ्युपगमा-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

द्बुध्युपारूढैरेव गुणैर्वयं कर्तृत्वादिधर्मयुक्ताः परस्परं सङ्कीर्णाः त्वं तु नेति तस्य विवेको दर्शनीयः । किमतः अतश्च ।

तथा दर्शितदार्शित्वे
मिथ्यादर्शी पुमान् भवेत् ।
मिथ्यादर्शनसाध्यत्वं
मोक्षस्येति सुदुर्घटम् ॥ १३८ ॥

एवं बुध्युपारूढगुणदार्शित्वे पुरुषस्य बुद्धेः परिमितत्वेन अपरिमितगुणविषयत्वासंभवात् । यदुक्तं "कपिलब्रह्मणो ऽप्यप्रत्यक्षा गुणा इत्येकदेशेन तैर्बुद्धावुपारोहिणीयं । एकदेशेन तत्त्वप्रतिपत्तिरप्रतिपत्तिः । नीलगिरिरिति नीलेपाधौ हिमवति तत्प्रतिपत्तिर्मिथ्यैव । न च मिथ्याज्ञानान्मोक्षः । अयुक्तत्वात् ।

कर्तृत्वादि गुणा ह्येते
गुणानामिति हीदृशी ।
दर्शने पुरुषस्येष्टे
हता दर्शितदार्शिता ॥ १३९ ॥

बुद्धिप्रदर्शित एवार्थः पुरुषेण दृश्यत इति भवद्भिर्यदुक्तं तत्साक्षात्स्वात्माविविक्तगुणदृष्टत्वे पुरुषस्य कल्प्यमाने व्याहतं अथोच्यते न साक्षात्पुरुषो गुणान् पश्यति नापि ते बुध्युपा०

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

रोहेण तस्य स्वात्मानं दर्शयन्ति । प्रोक्तविरोधात् । अपि तु गुणपुरुषयोरन्यत्वमात्रं दर्शयन्ति । तदपि न । यतः ।

अन्ये गुणाः पुमानन्य
इति नो दर्शयन्ति ते ।
गुणेभ्यो न गुणा येन
भिन्नास्सन्ति धियां निधेः ॥ १४० ॥
न चाऽपि विषयस्तेषा
मणुरित्युदितं पुरा ।

यदि हि न स्वात्मानं दर्शयन्ति तर्हि गुणान्तराणामन्यत्वं दर्शयन्तीति प्राप्तं । न च धियां निधेः बुद्धिनिधानाद्गुणलक्षणादन्ये गुणास्संभवन्ति ।

न चाप्यात्मा तेषां विषय इत्युक्तं प्राक् । परिणामी पुमान् भोग्यः प्राप्तस्तद्गोचरो यदि, इति कथमविषये तदन्यत्वं दर्शयेयुः ।

विवेकविषयं तस्मा-
द्दर्शनं नोपपद्यते ॥ १४१ ॥

इत्थं विवेकदर्शनानुपपत्तेः कुतः कैवल्यावाप्तिर्मोक्ष इति सर्वज्ञतादिरूपस्तव मोक्षोऽभ्युपगन्तव्यः । शाक्तादिदृष्टीनां कावार्तेत्युच्यते ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यथोक्तपशुपाशेषु
साध्यसाधनवर्जनात् ।
पाशात्मिकास्ततो हेया
दृष्टयो वादिनां बुधैः ॥ १४२ ॥

यतः यथोक्ते पशुविषये पाशविषये च प्रमाणतस्सिद्धे यत्साध्यं मुक्तिस्तद्विच्छेददर्शनं च साधनं। तन्नसाधयन्त्यविषयत्वात् । अतोऽन्यवादिदृष्टयोऽश्रेयःफलाः श्रेयोऽर्थिभिः परिहार्याः । अत एव च ।

पशुपाशादिवैशिष्ट्य-
प्रकाशकमबाधितम् ।
शैवं तदधिकार्थत्वा
द्विदुषः कस्य न प्रियम् ॥ १४३ ।

न हि दर्शनान्तरैः पशुपाशाद्यदृष्टमेव । किं तु यथाभूतं तथा विशिष्टं दृष्टमिति तद्वैशिष्ट्यप्रकाशकम् अत एवागृहीतग्राहि प्रोक्तवत्प्रत्यक्षानुमानाभ्यां सुसंवादं शैवागमाख्यं प्रमाणं प्रत्यक्षादिवत्कस्य नाभिमतम् । नन्वागमान्तराणामपि प्रमाणत्वात्तद्विरोधेऽस्य कथं प्रमाणतेति । अत्रोच्यते ।

पाशदृष्टिविरोधाय
प्रवृत्तमपि मानताम् ।

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

न जहाति यतश्छेद्याः
पाशास्तस्येह सर्वतः ॥

नानेन दृष्ट्यन्तराण्यपोद्यन्ते । किं तु दृष्ट्यानैतदेवमिति पाशात्मकतदर्थबाधकत्वेनैवास्योत्पत्तेस्तद्विरोधान्नेदं रजतं शुक्तैवेयमिति ज्ञानस्येव न प्रामाण्यं विहन्तुं क्षमं । नापि दृष्ट्यन्तरैस्सहास्य विरोधः यतः ।

न च स्वगोचरे तासां
बाधते तत्प्रमाणताम् ।

न च तच्छैवाख्यं प्रमाणं दृष्टयन्तराणां असत्यार्थत्वं प्रतिपादयति । येन तैस्साहस्य विरोधस्यात् । अपि तु प्रत्यक्षादीनामिवाल्पार्थदर्शित्वेऽपि यथास्वं प्राप्यप्रापकत्वेन प्रमाण्यमेवेत्येतच्चोक्तमस्माभिः 'सर्वागमप्रामाण्ये' अपि च ।

तासु वर्णाश्रमाचारा-
नभ्यनुज्ञातवच्च तत् ॥ १४५ ॥

यदाहुः 'इति वर्णाश्रमाचारान्मनसाऽपि न लङ्घयत् । यो यस्मिन्नाश्रमे तिष्ठन् दीक्षितश्शिवशासने । स तस्मिन्नेव सन्तिष्ठन् शिवधर्मं च पालयेत्' इति । अत एव युष्मद्दृष्ट्याप्यस्य न पाषण्डत्वं वेदाविरोधात् । वेदवित्परिग्रहश्च

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

श्रूयते यतः । पुराणेतिहासादौ श्वेतोपमन्युप्रभृतीनां महर्षीणामत्रानुष्ठानं भारते च नरनारायणयोरश्वत्थाम्नश्च । आभ्यां लिङ्गेऽर्चितो देवस्त्वयार्चायां युगे युगे' इति सुवर्णाक्षे च भगवतो वासुदेवस्य परमेश्वराराधनात्सिद्धिः । अपि चान्य-त्प्रियतमो लोके कृष्ण भविष्यति । त्वन्मुखे च जगत्सर्वं भविष्यति न संशयः । इति । रामायणे कार्तवीर्यादेस्स्मृतिषु च प्रतिष्ठादिपूर्वो धर्मः 'पक्वेष्टकाचितं सम्यग्यः करोति शिवालयं' 'इति। सूत्रे' तत्र मोक्षं विनिर्दि-शेदिति । दृश्यन्ते च प्रथुकेश्वररामेश्वरादयः प्रतिष्ठापिताः वेदेऽपि श्वेताश्वतरादिशाखास्वथर्वशिरः प्रभृतिषु च मन्त्रेषु शैवसंप्रत्ययः ततो न विगानं । नापि विच्छिन्नमूलता न च कैश्चिदेव परिग्रहः । युष्मदृष्ट्याप्यप्रामाण्यं स्यात् । किंच ।

न चान्येन प्रमाणेन
संरुद्धस्तस्य गोचरः ।
श्रोत्रियैरप्यतो ग्राह्यं
तत्फलाऽधिकसाधनम् ॥ १४६ ॥

न च प्रत्यक्षेण वाऽनुमानेन वास्यबाधेत्युक्तं प्राग्भोगप्रक-रणे । येनाग्निनासिंचेदित्यादेरिवाप्रामाण्यं स्यादिति सर्वमवि

Center for Shaiva Studies, Pondicherry Collection

ublic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

रुद्धं परश्रेयोहेतुर्वेदविद्भिरन्यैश्च प्रामाणमेतद्ग्राह्यम्। न च दृष्टस्यान्तरैरन्यस्य बाधा; यतः—

न ताभिरभिभाव्याभि-
स्सामान्याभिश्च बाध्यते;
ताभ्यो विलक्षणत्वात्तु
तथा चाविषयत्वतः॥ १४७॥

वेदादीनामपि रचना कर्तारं न व्यभिचरति। हिरण्यगर्भप्रभृतयः कर्तारोऽभियुक्तैस्स्मर्यन्ते। गीतासु च, वेदान्तकृद्वेदविदेव चाहमिति। तेषां च परस्परविरुद्धार्थशास्त्रोपदेशादसर्वज्ञत्वं। यदाहुः 'सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा। अथोभावपि सर्वज्ञौ मतिभेदस्तयोः कथम्। इति असर्वज्ञसामान्यकर्तृप्रणीतदृष्टयोऽप्यसर्वविषयाः सर्वज्ञप्रणीतशास्त्राभिभाव्यास्ताः कथं तदेवाभिभावकं सर्वज्ञप्रणीतत्वाद्वक्ष्यमाणवत्सर्वान्यागमार्थपरिच्छेदकत्वेन ताभ्यो विलक्षणं विषयीकृतं च बाध्यते। यथा तेन विषयीकृताः तथा न ताभिस्तदिति।

यथा मेयफले तासां
तदनूद्य प्रकाशते।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्वप्रमेयफलारूढं
वैशिष्ट्यं न तथा कृताः ॥ १४८ ॥

तस्य मेयफलं चोक्त्वा
स्वप्रमेयफलाश्रितम् ।
वैशिष्ट्यमवभासन्ते
तस्मात्तासां न गोचरः ॥ १४९ ॥

यथा हि तच्छैवं तासां दृष्टीनां मेयफलविषयं वैशिष्ट्यं स्वप्रमेयफलारूढं। बुद्धितत्त्वे स्थिता बौद्धा गुणेषु त्वार्हताः स्थिताः इत्याद्यनूद्य सर्वविषयत्वेन प्रकाशते । न तथा तत्फलविषयं ताभिस्सर्वाभिर्गोचरीकर्तुमशक्यं । अतः कथमविषये बाधकत्वं तासां स्यात् । अत एव ॥

अभ्यनुज्ञानिषेधो वा
तेन तासु विनिश्चितम् ।
तत्तुल्यजातिदृग्व्याप्यो
न शैवज्ञानगोचरः ॥ १५० ॥

यतोऽसर्वज्ञप्रणीतत्वेन दुर्बलत्वं तासां ततश्शैवागमाविरोधेन स्वविषयानुष्ठाने अभ्युपगम एव । इति वर्णाश्रमाचारान्मनसाऽपि न लङ्घयेत् । इति । तद्विरोधेतु निषेधः । 'कुर्या-

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and

ङ्क्राह्मीं न वा कुर्याच्छैवीमेव नियोगतः । इति । न तु ताभिरसर्वज्ञप्रणीताभिस्तुल्यजन्मज्ञानं तेन व्याप्यो भवति कदाचिदपि शैवज्ञानगोचरोऽर्थः । न च कार्यत्वादनित्यत्वमस्य । यतः ।

अनादिकालसंसिद्धं
तद्गुणत्वेऽपि शाङ्करे ।
तच्च सम्यक् परिच्छेदि
शाङ्करं ज्ञानमीरितम् ॥ १५१ ॥

शब्दार्थरूपो ह्यागमः । तत्र तन्त्ररूपस्येश्वरकृतत्वेऽपि तदर्थस्य परमेश्वरसमवेतस्य सम्यक् ज्ञानादेर्गुणस्य नित्यत्वान्नित्यत्वम् । अत एव तत्प्रमाणम् । अत एव ।

न चाविहतशक्तित्वा-
त्पत्युर्बाधं तदश्नुते ।
न तुल्यफलताप्यस्मा-
त्कुतो निष्फलता भवेत् ॥ १५२ ॥

न तन्निष्फलं नापि दृष्ट्यन्तरैस्समानफलं । बाध्यमानफलं वा । किं तूक्तमेव । तत्प्रामाण्यं भगवतोऽप्रतिहतशक्तित्वेन सर्वोत्तमत्वात् । अस्तु वा दृष्ट्यन्तरैस्सह समानत्वं । तथाऽपि न पाक्षिकमुपादानम् । यतः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ग्राह्यं तुल्यफलत्वेऽपि
विमुक्तिर्दीक्षयैव तत् ।
सिद्धिदं तु यतः पुंसां
साधनेन लघीयसा ॥ १५३ ॥

को ह्यभिप्रेतसाधनं लघुतरं परित्यज्य क्लेशहेतावतिविस्तीर्णे प्रवर्तते । तदुक्तम् । "अत्रैव मधु विन्देत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संप्राप्तौ को विद्वान् यत्नमाचरेदिति । किं च ।

सिद्धिव्यापारनिर्मुक्ता
मुक्तिरप्यतिशायिनी ।
यत्र तत्को न गृह्णाति
साधनं श्रुतिभूषणम् ॥ १५४ ॥

यस्मिन् शास्त्रे सर्वोत्कृष्टं फलं श्रूयते तत्रान्यपरित्यागेन को न प्रवर्तेत इति दृष्टयन्तरैस्तुल्यफलत्वेऽपि न विकल्पिता प्रवृत्तिरत्रेति । ननु परमेश्वरप्रणीतं तदिति कुतस्तदुच्यते ।

शिवात्परंपरायातौ
भोगमोक्षौ ससाधनौ ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

आत्रेयाय मुनीन्द्रेण
गुरुणा संप्रकाशितौ ॥ १५५ ॥

मन्दबुद्धिप्रबोधाय
करुणाविष्टधीस्स्फुटम् ।
सद्योज्योतिस्तु संक्षेपा-
त्तावेतौ परिबद्धवान् ॥ १५६ ॥

यं चानुशासयामास
भगवानीशसंमतः ।
उग्रज्योतिर्गुरुश्श्रीमान्
सर्वविद्यासरित्पतिः ॥ १५७ ॥

गुर्वाम्नायतोऽविच्छिन्नस्मरणसन्ततेरेव पारमेश्वरत्वेनैत-स्प्रतीयते । सर्वश्रेयोहेतुरिति ।

इति मोक्षकारिकायां नारायणकण्ठसूनुना रचिता ।
संक्षेपाद्वृत्तिरियं शिष्यहिता भट्टरामकण्ठेन ॥

इति श्रीनारायणकण्ठात्मजभट्टरामकण्ठकृत-

मोक्षकारिकावृत्तिस्समाप्ता ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

॥ श्रीः ॥

॥ परमोक्षनिरासकारिका ॥

(सव्याख्या)

यां सांख्ययोगविद्वांसो गतिं मोहात्प्रपेदिरे ।
वेदान्तज्ञानविद्वांसो गतिमिच्छन्ति वैदिकीम् ॥

पाञ्चरात्ररता ये च ये च योगिमहेश्वराः ।
प्रमाणप्रमेयकर्तृत्वविशिखामलकारकाः ।
प्रवदन्ति मलासिद्धा ये चान्ये मोक्षवादिनः ॥

[इति रौरवसूत्रम् ।]

तदियता शिवहस्तस्य प्राधान्यं प्रतिपाद्य अधुना दीक्षाफलस्य प्रमाणस्य तावद्व्यतिरेकेण समानासमानतन्त्रान्तरगीतानि फलानि दर्शयितुं यां सांख्ययोगविद्वांस इत्यादेस्सार्धसूत्रद्वयस्य कारिकाभिरर्थमाह—

सत्संस्कारस्य यस्येद-
मङ्गजातं निरूपितम् ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तत्फलव्यतिरेकाय
यदुक्तं फलवर्णनम् । १ ॥

यस्य शिवहस्तादीन्यङ्गानि दत्तपूर्वाणि तस्य संस्कारस्याऽयोगान्ययोगव्यवच्छेदेनापवर्गकारणत्वतस्सदिति विशेषितस्य दीक्षाख्यस्य यत्फलं वक्ष्यमाणमशेषबन्धनिवृत्तौ स्वगुणसर्वज्ञत्वाद्यभिव्यक्तिः तद्भेदेन तन्त्रान्तरगीतानि फलानि वर्ण्यन्ते । फलभेदकथनप्रयोजनं च वक्ष्यत्युपसंहारे 'तत्साधनेषु' इत्यादिना ।

तत्र क्रमेण तानुद्दिशति ।

कैवल्यं सत्वसंभोगो
विलयः परमात्मनि ।
अव्याकृतादिष्वव्यक्तत्वं
लय एव विकारिषु ॥ २ ॥

कैवल्यमिति । गुणत्रयलक्षणप्रकृतिसंबन्धो हि अकेवलताहेतुरात्मनः । स च न संबन्धमात्रं, तयोर्व्यापकत्वादात्मनः कैवल्यावस्थायामपि तस्य भावात्तथात्वानुपपत्तेः । अपि तु भोक्तृभोग्यरूपोऽनादिस्तदविवेकप्रतिपत्त्यात्मकः । प्रत्ययाविवेकरूपत्वात् भोक्तृभावस्य । यदाहुः 'प्रत्ययाविवेको भोग'

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

इति । प्रकृतिर्ह्यात्मानं भोग्यत्वेन समर्पयन्त्यपि पुंसस्तमस्सामर्थ्योपार्जितक्लेशभूताविद्यास्मितादिशक्तियोगेन तथा समर्पयन्ती विदग्धवेश्यावत् न यथा तद्विकारशेषेषु तस्य हेयत्वबुद्धिरुपजायते । अन्यथा तदतिरिक्तबन्धासिद्धेः भोगायोगात् संस्काराभावप्रसङ्गात् । स एव च संस्कारः कैवल्यप्रतिपक्षभूतः प्रोच्यते । यदा त्वात्मज्ञानाद्योगाद्वा तस्मात्पुंसस्स्वरूपेण भास्वरेणानन्यरूषितेन विवेकः प्रकाशते । तदानीं तेनाविवेकस्य प्रतिपक्षतयैवापध्वंसित्वात्तदात्मकस्यापि प्रसारस्य तं प्रत्यनुदयात् सर्वात्मना प्रकृतेः भोग्यत्वनिवृत्तौ तस्य परं कैवल्यं मुक्तिरिति तच्छास्त्रवित्प्रवराः ।

फलान्तरमाह । **स्वत्वसंभोग** इत्यादिना । अनादिरेव प्रकृतिसंबन्धः पुरुषो भोक्तृतया सर्वैरभ्युपगतः । न च तद्भोक्तृत्वमौपाधिकं तस्य तथात्वे हि तस्य न तत्स्यात् । अन्यकृतस्य धर्मस्य नित्यकर्मव्यतिकरायोगात् व्यतिकरे वा नासौ भोक्तेति कस्य बन्धो मोक्षो वेति भोक्तृत्वं स्वभावात्मकमेष्टव्यं । न चानादेर्नित्यस्वभावस्य विनाशो युक्तः केवले पुरुषेऽपि तथाभावप्रसङ्गतो वैनाशिकत्वप्राप्तेः तद्विनाशासंभवादेव च मुक्तावपि भोक्तृभोग्यसंबन्धः पुंप्रकृत्योरेष्टव्यः केवलं चानादिकर्मदौरात्म्यतः प्राक् दुःखमोहान्तरितसुखव्यरूपिका प्रकृतिस्तस्य भोग्याभूद्यत्पुनस्तत्कारणभूतसर्व-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कर्मप्रत्यस्तं यतो मुक्तौ शुद्धनिरन्तरानतिशयानवच्छिन्नसत्वात्मसुखरूपोऽसौ भोग्येति तत्प्राप्ताः किल सत्त्वभुजः प्रोच्यन्त इति तदागमविदां पीठबन्धः । **विलयः परमात्मनीति** शास्त्रान्तरफलं । सर्वं खल्विदं ब्रह्म । नेह नानास्ति किंचन इति श्रुतिलक्षणात् सिद्धार्थविषयलब्धप्रामाण्यादपौरुषेयतया तदन्यागमेभ्यः प्रबलतररूपादागमात्प्रतिपन्नस्य परमानन्दाद्येकतदागमगीतगुणस्वभावस्य प्रमाणान्तरगोचरानवच्छिन्नचिद्ब्रह्मणस्सत्यतया तदन्येषां च भेदरूपाणां अविद्यादिनिर्माणैकसारत्वेनासत्यतयावगतिः । तत एव तदाहुः 'आत्मा यतः प्रसिद्धं च कवयोऽस्य प्रचक्षते' इति न चास्यागमस्य भेदसत्ताप्रमाणभूतप्रत्यक्षादिबाधे अग्निना सिञ्चेत्यादेरिवाप्रामाण्यमाशङ्कनीयम् । भेदस्येतरेतराभावप्रसिद्धिव्यपेक्षत्वेन वस्तुमात्रग्राहि प्रत्यक्षविषयत्वासिद्धेः । शशविषाणवदविद्यामात्रकल्पितत्वेनासत्यत्वात् । तदुक्तं 'आहुर्विधातृ प्रत्यक्षमिति । एवं च सति जीवात्मनामपि स्वतः प्रमाणसिद्धप्रोक्तसत्यभूतपरमात्मसारत्वेऽपि अविद्याकलुषितत्वेन भ्रान्तत्वात् प्रसुप्तपुरुषसाधारणानामिव स्वप्नानुभववृत्तीनां तात्त्विकप्रबोधानुदयतस्तद्रूपानुपज्ञातबोधकस्संसाराभिधानभेदकप्रपञ्चः स्वरूपतोऽनिदंप्रथमः । कदाचित्तु 'आत्मा ज्ञातव्य' इत्यादिशास्त्रगीतक्रमेण प्रोद्गूणतरज्ञानप्राप्तितस्तत्प्रतिपक्षभूत-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भ्रान्तिकारणप्रोन्मूलनेन तिरस्कृताखिलभ्रान्तिः परमात्मबोधस्सुप्तप्रबुद्धस्येव स्वरूपमात्रप्रतिष्ठो जीवात्मनः पूर्वप्रवाहाविलयरूपो भवतीति। सैव परा मुक्तिरिति केषांचिद्धृदः। नन्वत्र वृत्तिकर्तुः परिणातिवेदान्तमतिरेवोद्देश्यतयाभिमता न मायावादमतिः। सैव उपादानत्वसंसिद्धिरिति वक्ष्यमाणदूषणानुसारिणी। सत्यं तदनुसारिणी। किं तु नैषा वेदान्तेषु अध्यात्मवित्प्रवरैर्मुख्यत्वेन गीयते। न चात्र श्रुतयोऽनुरूपाः सैव च यथा दूषणानुसारिणी तथाऽत्रैव वक्ष्यामः। अव्याकृतादिष्वित्यागमान्तरफलोद्देशः। यत्र तिष्ठन्त्यणीयांसः क्षेत्रज्ञाः कर्मभिस्सह। तदव्याकृतमुच्यते कुत्र तिष्ठन्ति, अत्र केचिदाहुः इह यथा मृदन्वितेषु घटादिषु मृत्कार्यत्व दर्शनाद्भवद्भिस्सुखाद्यन्वितेष्वपि कार्यकारणादिषु सुखादिरूपप्रधानकारणत्वमिष्यते। तथैवात्मनां प्रधानस्य च भेदेऽप्येकसदन्वयसंभवादेककारणत्वमिष्यताम्। अत्र वा तन्माभूदिति विशेषाभावात्तेषां यत्कारणं सा परा प्रकृतिः महाविभूत्यभिधाना जडा जडकारणत्वात् सैव साक्षादीश्वरलक्षणेन चातुरात्म्येनानीश्वरक्षेत्रज्ञात्मना जडात्मकाविद्यारूपेण च परिणमते विद्या तु बुद्धिमनोभूता अविशेषात्तन्मात्रतयाभूता विशेषाच्च भूततया भूतानीन्द्रियत्वेनेत्येवं क्रमेण सैव तथा तथा परिणमत इति परत्वं तस्याः। तदाहुः। भगवान्वासुदेवः परा प्र

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

कृतिर्ज्यायसी, विभूतिर्भूतिरेव च सस्वयं भवति भूतो भावी-त्येवमणीयस्तया, अव्यापकव्यापकत्वेन तत्रैव कार्यत्वात् क्षेत्रज्ञाः तिष्ठन्तीति तत एवोपादानकारणाद्विकृतिधर्मकादविद्याकर्मानुबन्धेन जीवात्मनां संभवात्। तत्क्षयतस्समुपशान्तकार्यभेदरूपे तस्मिन् परमकारणात्मनि तेषां विलयः परं श्रेय इति केषांचिद्गुरभ्युपगमः। अव्याकृतादिष्वित्यादिग्रहणात्प्रकृतिलयवादिनोऽवोक्तवतो येऽवस्थितास्त्वहङ्कारादिलयवादिनस्तौष्टिकाः तदुक्तं 'आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभागाख्याः। बाह्यविषयोपरमाः पञ्च नव चतुष्टयोऽभिहिताः। इति।

महागणो महेशस्य
त्वकर्ता सर्ववेद्यवित्।
कर्तृत्वेऽपि प्रयोज्यत्वं
समत्वं तेजसां निधेः ॥ ३ ॥

फलान्तरं सालोक्यसामीप्यादिप्राप्तिः। यदुक्तं पौष्करे 'अन्याभिरिह दीक्षाभिर्न निर्वाणमवाप्यते। गाणपत्यपदं ताभिरिति। एतदेव च योगिपदेन सूत्रकृता निर्दिष्टं। अकर्ता सर्ववेद्यविदिति दर्शनान्तरफलं। परमेश्वरे तावत्कर्मकर्तृत्वं तनुकरणभुवनादिकार्यान्यथानुपपत्त्या प्रतिपादितम् एतस्मिन्नव-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्थितेऽधुना मुक्तपुरुषे कर्तृत्वसिद्धौ न कार्यान्यथानुपपत्तिः भवति । अथ ईश्वरवन्मुक्तत्वेन कर्तृत्वासिद्धिः । तदयुक्तम् । ईश्वरस्य मुक्तत्वासिद्धेः अदृष्टान्तत्वात् बद्धो हि मुच्यत इति ईश्वरसिद्धयोरनेनांशेनात्यन्तवैसादृश्यं । यथाह व्यासाश्रिण्यां तत्रभवानवधूतः । "परमशिवः सिद्धान् प्रत्युपरताधिकारो ऽप्यन्येष्वनुपरताधिकारस्सिद्धः । पुनरेकान्तेन सर्वत एवो परताधिकार इति भेद इति । न च प्रागपि पुंसः कर्तृत्वमित्याहुः । किं तु प्रकृतेरेव तत् सांख्यपक्षवदिति मुक्तौ कर्तृत्वस्य प्रमाणाभावात् अकर्तृत्वमेव । ज्ञानं तु पुंसस्वाभाविकं प्रागनुभवतास्सिद्धः । तत्तु मुक्तावावरणाभावेन सर्वविषयं भवतीत्यकर्ता सर्ववेद्यविन्मुक्त इति तदागमविदः । त एव हृदयप्रमाणादिग्रन्थकर्तृत्वेनात्र सूत्रकृता प्रमाणकर्तृत्वपदेनोपक्षिप्ताः । **कर्तृत्वेऽपि प्रयोज्यत्व** मित्यागमान्तरम् । अयमर्थः ज्ञातृत्ववत्कर्तृत्वमपि पुंसस्स्वभाव एव । न तु प्रकृतेः कर्तृत्वं युक्तं कारणत्वात्तस्याः अन्यद्धि कारणत्वं स्वरूपान्यथाभावरूपं जडवस्तुषु स्वभावतयैव परिणामित्वाद्यव्यभिचारि क्षीरदध्यादिष्वध्यक्षसिद्धम् । अन्यच्च कर्तृत्वं हिताहितप्राप्तित्यागफललिप्सया सर्वान्यकारकप्रवृत्तिनिवृत्तिकारणत्वेन स्वातन्त्र्यात्मकं शिवत्वाव्यभिचारि स्वसंवेदनसिद्धमिति वक्ष्यामो 'मन्त्रवार्तिके । अनुमानेनाप्यात्मनां कर्तृत्वं साधि-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तमेव तत्वसङ्ग्रहादौ वृत्तिकृता । ननु कर्तृत्वे सत्यात्मनां स्पन्दात्मकत्वेन परिणामिता । न । कर्तृत्वस्य स्पन्दात्मकत्वासिद्धेः, क्रिया हि स्पन्दः न च क्रियारूपत्वं कर्तुः कर्तृत्वं । कर्त्रन्तरकल्पनायामनवस्थाप्रसङ्गात् । अपि तु तत्र हेतुतैव तत्सामर्थ्येनैव कार्यकरणस्पन्ददृष्टेरिति । जडव्यापकक्रियात्मकस्पन्दः कथं चैतन्यव्यापकत्वाव्यभिचारिणि कर्तरि भवेत् ! न च स्पन्दात्मकतैव कारकत्वं, अपि तु विशिष्टशक्तियोगः, अयस्कान्तादीनामिवेत्युक्तमस्माभिरन्यत्र जडस्पन्दक्रियायां, या शक्तिस्सा कर्तृता चितो व्याप्ते स्पन्दरूपेण सिद्धाऽयस्कान्तवत्स्वत इति, तच्च कर्तृत्वं तेषामनाद्येवेश्वरप्रयोज्यतया सिद्धम् । अनादेश्च विनाशो न संभवतीति मुक्ताः शिवास्सर्वज्ञास्सर्वकर्तारः परमशिवेन प्रयोज्या एवेति तन्नीतिज्ञाः । समत्वं तेजसां निधे रिति दर्शनान्तरफलम् । आदित्याग्न्यादिसमता तत्तदागमेषु महोपनिषदादिषु श्रूयते । यतः आग्नेयकर्तृत्वेन चैते सूत्रकृता निर्दिष्टाः ।

आधिक्यं परमेशाना-
न्निर्मलत्वं च केवलम्
सिद्ध एव हि कर्तृत्व-
मौदासीन्यं महेश्वरे ॥ ४ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

फलान्तरं । परमेशस्य लयाधिकाराभ्युपगमेनाधिकारादि बन्धयोगतः पशुत्वस्यानपायात् । यदाहुः 'अनुग्रहतिरोभावौ द्वौ पाशौ तु सदाशिवे ।' इति । पशुराद्यस्सदाशिव इति च । विनिवृत्तसमस्तबन्धनात्तिरस्कृतलयाद्यवस्थाधिकारात्सर्वथैवानुपाधेस्सिद्धात्मनः प्रकृष्टतरो न्यूनभाव इति । अन्ये तु पातञ्जलमुक्तिरूपश्चिन्मेति कथयन्ति । तेषां पूर्वमेव कैवल्यपदेन सांख्यमुक्तिवत्साप्युपात्तेति पौनरुक्त्यमनिवार्यम् । न हि तयोर्मुक्तौ भेदः प्रकृतिवियोगरूपत्वादुभयत्रापि तस्याः, अत एवाहुरेकं सांख्यं योगं चेति । किं तूपायभेदः । एकत्र हि ज्ञानं तदुपायः । अपरत्र त्वभ्यास इत्यलं विस्तरेण इति । एतदेव चाधिक्यं सूत्रकृता महेश्वरपदेनोक्तम् । **निर्मलत्वं च केवलमिति** मलनिवृत्तिमात्रमेव मोक्षः । न तु सर्वज्ञत्वाद्यभिव्यक्तिरपि प्रागनभिव्यक्ततत्सत्त्वभावे प्रमाणाभावात् । सतो ह्यभिव्यक्तिरित्याशयः । **सिद्ध एव हि कर्तृत्वमौदासीन्यं महेश्वर इति** । यदाह' सूत्रकृत् विशिखामलकारक इति । परमेश्वरो हि पारार्थ्येन जगत्कारणाय प्रवृत्तः । सर्वकर्तृत्वपदप्राप्तावस्थं स्वात्मतुल्यं सिद्धमवलोक्य तत्कालमेवात्मनः कर्तृत्वं विभिन्नमित्यनेककर्तृसंभवेन समस्तकृत्यानियमप्रसङ्गदोषतः प्रत्युत परार्थानिर्वाहकारणमेवावगम्य तदुप हत्योदासीनस्वात्मना भवति । सिद्धः पुनः परार्थनिर्वाहमनास्थ-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

येश्वरेणोक्तमवबुध्य सर्वकर्त्रा च विना सर्वपरार्थसंपत्तिमाकलय्य करुणयैव सर्वकर्तृत्वपदमवलंबत इति प्रवाहनित्येश्वरवादिनः ।

सत्कार्यकरणोपेत-
स्तारका भुवने स्थितिः
ज्ञानकर्तृत्वयोर्नाश
स्सर्वनाशस्तथापरः ॥ ५

अनादिरेव पुरुषः कार्यकरणैः प्रवाहतस्संसारी **तावत्संबन्ध** तत्रानादेर्विनाशायोगेन मुक्तौ कार्यकरणाभावे प्रमाणासंभवात् केवलं संसारपरिदृष्टकर्मनिबन्धनदुःखशरीरेन्द्रियनिवृत्तौ प्रकृष्टतरकार्यकरणलाभतः तारकाभुवने नक्षत्रमार्गेऽवस्थानमात्मनां मोक्ष इति केषांचिद्दुरभिसन्धिः । **ज्ञानकर्तृत्वयोर्नाश** इति । मुक्तौ बुद्धेरभावादिच्छाप्रयत्नयोरभावे कर्तृत्वनाशः, बुद्ध्यादीनां भावश्च नवानामात्मगुणानां भावात् । यदाहुः "बुद्धिसुखदुःखेच्छा द्वेषप्रयत्नसंस्कारधर्माधर्माणां नवानामत्यन्तं विमोक्षोऽपवर्ग इति । **सर्वनाशस्तथापर** इति ग्राहकैकरूपत्वाच्चैतन्यस्य ग्राहकत्वस्य च ग्राह्यापेक्षयाऽवस्थितेः ग्राह्यस्य चाणुस्थूलादिविकल्पैः सर्वथा संभवाभावेनावस्तुरूपत्वात्तदपेक्षस्यापि ग्राहकत्वस्य भ्रान्तत्वे

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सति बाधज्ञानोदयमात्रेणैव ध्वंस इति प्रदीपनिर्वाणवादिनः इति। अन्यैस्तु। भूतेभ्य एव विज्ञानमुत्पद्यते। तान्येवानुविनश्यतीति शरीरविनाशादेव सर्वनाश इति, एवमयं पक्षोऽभ्युपगतो जाड्यादिति। एवं च तन्त्रान्तरप्रसिद्धं फलं प्रदर्श्योपसंहरति—

स्वमतैर्वादिभिस्त्वेवं
विमुक्तिः परिकल्पिता।
दृष्टा नैव हि मोहान्धै-
स्तदीश्वरसमानता ॥ ६ ॥

तैस्तैर्मोहान्धैरविद्याक्रान्तचिन्नयनैस्सत्यभूतपरमेश्वरसमतालक्षणं पतिशास्त्रैकगम्यमुक्तिलक्षणं फलं न दृष्टम्। अतस्तैरेवंविधा मुक्तिस्स्वकल्पनाभिः कल्पितेति। इदानीं समानतान्त्रिकान् प्रत्याह—

समता च समुत्पत्ति-
सङ्क्रान्त्यावेशपक्षतः।
अभिव्यक्तिपरा गीता
बुद्धिवाचामगोचरा ॥ ७ ॥

सर्वज्ञत्वादिगुणाभिव्यक्तिरूपपरमेश्वरसमता परा प्रकृष्टा

P K 8

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

गिता । कुतः परेत्याह **समुत्पत्तिसङ्क्रान्तावेशपक्षत** इति । पश्ववस्थायां सर्वज्ञत्वादिधर्मासत्त्वान्मुक्तौ च परमेश्वरसमत्वश्रुत्यन्यथानुपपत्त्या पश्वात्मन्यपूर्व एव तदा सर्वज्ञत्वादिगुणः परमेश्वरसम उत्पद्यत इति उत्पत्तिसमतापक्षः कैश्चिदभ्युपगतः । तथा परैरपि पटादौ कस्तूरिकामोदवत्तत्र परमेश्वरगुणस्सङ्क्रामति मुक्ताविति समतासङ्क्रान्तिपक्षः प्रतिपन्नः एतेन शिखासंक्रान्तिवादिनः पाशुपताः सूत्रकृता विशिखाकारकत्वेनोक्ताः । अन्यैस्तु तदा परमेश्वरगुणैस्स्वाश्रयस्थैरेवसिद्धस्समाविश्यते ग्रहैरिव पुरुष इत्यावेशपक्षः । एतेभ्य ईश्वरसमतापक्षान्तरेभ्यः इयमभिव्यक्तिसमता वक्ष्यमाणा बुद्धिवाचामगोचरत्वात्परा । एवं तन्त्रान्तरफलानि निर्दिश्यार्थक्रमेण प्रतिक्षिपति ।

सत्त्वभुक्तारकावासी
द्वयमेतद्विनश्वरम् ।
भोक्ता भुवनवासी च
दृष्टो लोके विनश्वरः ॥ ८ ॥

सत्त्वभुक्तारकावासीत्येतद्द्वयमपि फलं विनश्वरं । भोक्तुर्भुवनवासिनश्च देवदत्तादेर्विनाशो दृष्टः । ननु भोक्तृत्वं ज्ञातृत्वमेव पुरुषस्वभावोऽत्राकर्मफलं कथं विनश्यतीत्युक्तं

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

यद्येवं सर्वज्ञ एव तदा पुरुषो भवेत् न सत्त्वमात्रज्ञो विशेषहेत्वभावादित्यस्मद्दर्शनमेव भवतु । नन्वस्त्वेवं भुवनवासिनस्तु प्रवाहानादिभिर्भुवनादिभिस्सम्बन्धः कथं निवर्तते । अत एव प्रवाहानादित्वात्कर्मभिस्तत्तत्फलैर्वा कूटस्थानित्यस्वभावोऽनिवर्त्य इति परमार्थः ।

गणेन्द्राग्निसमौ प्रेर्या
वसम्पूर्णमनोरथौ ।
अकर्ता चाकृतार्थो हि
तद्वन्नेशो समो यतः ॥ ९ ॥

अत्र महागणो महेशस्य । समत्वं तेजसां निधेः इत्येतयोः पक्षयोः पराकृतिः । गणेन्द्रसमस्य तावदुपरितनपदसद्भावेनैव तत्प्राप्तिकामनानन्तरयोगतोऽसंपूर्णमनोरथतेति कथं मुक्तिः । एवमग्न्यादित्यसमययोरपि द्रष्टव्यं । अथास्मदाद्यप्रत्यक्षोऽन्य एव सर्वज्ञस्सर्वकर्ता च वह्न्यादित्यादिरुच्यते । यद्येवं तत्समत्वं मुक्तिरित्यस्मद्दर्शनमेवेत्यदोषः । अकर्ता चेत्यनेन अकर्ता सर्ववेद्यवित् । कर्तृत्वेऽपि प्रयोज्यत्वमित्येतौ पक्षावपोद्येते । तद्वदिति । यद्वद्गणेन्द्राग्निसमावपरिपूर्णमनोरथावुक्तौ । तद्वदेतावपि परमेश्वरसमकर्तृकत्वपदाप्राप्तिहेतोस्तदभिलाषयोगादपरिपूर्णमनोरथत्वात्सर्वज्ञात्वप्यमुक्तौ । स्व-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

रूपावाप्तिरेव हि मोक्षः । कर्तृत्वमपि ज्ञातृत्ववत्पुंसस्स्वभाव एवेत्युक्तम् । अतस्तदनवाप्तौ कथं मुक्तिः । अस्त्वेवं । मन्त्रेश्वर-प्रयोज्यत्वमनाद्यात्मनां कथं तदा व्यावर्तते बन्धनिमित्तत्वात्कलादिवदिति तदनिवृत्तेस्त्वसावपि विद्येश्वरवत्प्रेर्यत्वादमुक्त एवेति। आधिक्यं परमेशानादिति पक्षमाभासयति ।

आधिक्ये साधनासत्त्व-
मसंस्था च द्विमार्गतः ।
प्रेर्यत्वं परमेशाने
निर्निमित्तमथाऽऽपतेत् ॥ १० ॥

आधिक्ये साधनासत्त्वमिति । साधनासत्त्वं प्रमाणाभावः । न हि सर्वज्ञत्वसर्वकर्तृत्वरूपनिर्मलप्रकृष्टतरस्वगुणव्यक्तिप्रतिलंभतः कदाचिदात्मनामधिकावस्था प्रमाणैरुपपद्यते । यत्प्राप्तावीश्वराधिक्यं मुक्तौ वर्ण्यते । ननूक्तमीश्वरस्य लयाद्यवस्थासमावेशेन सिद्धं न्यूनत्वमिति । अथ कोऽयमवस्थासमावेशः यदि वस्त्वन्तरं तन्नेष्यते एकत्वाद्देवतायाः कथं धर्मपरिणतिस्थाप्याचैतन्यदोषेण पूर्वं निषिद्धा निषेत्स्यते च । अथ विवर्तस्सापि न असत्यत्वात्तद्रूपतास्य कुतः । केवलं क्रियाशक्तिः [1]कर्तर्यव्यतिरेकेण कर्तर्येवावस्थिता शिव-

2 कर्तव्यातिरस्कारेण इति पाठभेदः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

पदं समुद्दीपयन्ती लयादिपदवाच्यत्वोपाधिभावं तत्र प्रतिपद्यते। सैव यदा कार्यसंपादनप्रवृत्ताऽनवाप्तकार्यविकृतिस्तदा सदाशिवपदप्रकाशिका भोगादिशब्दवाच्यतायां कारणीभवति। यदा खल्ववाप्तकार्यग्रामा अधिकारपदप्रबोधिका तदेश्वरादिपदप्रवृत्तौ हेतुतां भजतीति क्रियाशक्तेरेव तत्तत्कार्योपाधिभेदालंबनमात्रेणैवात्र भेदव्यवहारः। न वस्तुभेदः। विवर्तपरिणामपक्षयोरत्यन्तासंभवात् इति गुरवस्सच्छास्त्रविवेकनिपुणाः। यदाहुः 'मूर्तिस्तद्वांश्चेति हि लेशादिकश्च शक्तिशक्तिमतोः, अत एव पञ्चस्रोतसोऽप्यस्य शास्त्रस्यैकत्वान्न देवताया भेदः। अपि तु सृष्टिस्थित्यादिपञ्चकृत्यभेदेनोपास्यमानस्य तदाकारमात्रस्यैव। अन्यथा कौलमहाव्रतादेरिवात्र शास्त्रभेदप्रसङ्गादेकत्वश्रुतिभिर्विरोधः। एवं च सिद्धस्य प्रोक्तलयाद्यवस्थानाभ्युपगमे कर्तृत्वादृष्टेः प्रत्युत ईश्वरान्न्यूनत्वमभिहितं स्यात् नाधिक्यम्। अथेश्वरस्यापि यत्परमेश्वरत्वं निरुपाधिज्योतिरूपा सर्वज्ञत्वादिशक्तिः। यदाहुः 'यया विना न सर्वज्ञस्सोऽपि तस्यै नमोऽस्तु ते' इति। तत्प्रकृष्टतरं परमेश्वरस्थानात्सिद्धप्राप्यमभ्युपगम्यत इति। तदयुक्तम्। शक्तिशक्तिमतोर्भेदासिद्धेर्व्यपदेशस्य भेदस्य कल्पितत्वात्। सर्वज्ञत्वादिशक्तेरिवेश्वरत्वस्यापि तद्रूपत्वाभान्योन्यता युक्तेत्यभिन्नस्वभावः। शाब्दस्तु भेदो न बाध्यते।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

तेन च ततोऽर्थस्थितिश्शक्तेरपि यरुछक्तत्वं तस्यापि यः प्रकर्षः तस्यापि प्रकृष्टतरावस्था मुक्तिरित्येवं तरतमादिप्रतिषाद्यप्रकर्षभेदाव्यवस्थितेः अनवस्थितिरेव मुक्तौ भवेत् । कल्पितव्यपदेशमात्रभेदस्य न क्वचिदप्यप्रसृतिः । तस्मादीश्वरसमतैव मुक्तावभ्युपगन्तव्या । न त्वाधिक्यम् । अनुग्रहतिरोभावकर्तृत्वं कर्तृत्वविशेषात्मकत्वाच्च पाशात्मकम् । अनौपाधिकत्वात् । यदपि पशुत्वमुक्तं भवता तदाभिमानिकभेदकल्पनया शक्त्यन्तरप्रकाशप्रतिपादनफलं योगपीठसंस्थितायेति मन्त्रभाष्यप्रतिपादितभगवत्सदाशिवपीठभाववत्सकलशास्त्रपर्यालोचनयोपचारदृशा व्याख्येयम् । न तु पदमात्रार्थप्रतिपत्तौ ग्रहो बलवद्विधेयः । इत्यलमनुवासितगुरुभिः स्वकल्पनोत्थापितशास्त्रार्थशालिभिस्सह विवादेन । यद्वा पशुराद्यस्सदाशिव इति संस्कार्यसदाशिवाभिप्रायेणानुपचारत एव । तथा हि दीक्षायां विद्यातत्त्वादुद्धृतस्य क्रमेण मलक्षपणपूर्वं क्रियाशक्त्यात्मशिवत्वाभिव्यक्तिस्स्थूलसूक्ष्मपरभेदेन क्रियमाणाऽनेकविद्येश्वरावस्थास्वरूपाभिव्यक्तिर्वस्तुतोऽभिन्ना भिन्नस्येश्वरसदाशिवशिवरूपस्य तत्वत्रयस्य प्राप्तिहेतुर्भवतीति तस्मिन् सदाशिवे प्रेर्यत्वानिवृत्तेस्संस्कारमात्रविशेषत्वेन मलसद्भावात्पशुत्वमव्यावृत्तमेवेत्यनुपचारात्पशुशब्दप्रवृत्तेरिति । एतच्च वक्ष्यति वृत्तिकारः । दीक्षायान्ते हि

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

क संभवन्तीत्यादिना संस्कारके तु सादाशिवे परमार्थतश्शि-वाच्छेदासंभवेन तथात्वमित्युपचारः प्रोक्तः । दोषान्तरम-प्यस्मिन् पक्ष इत्याह । **असंस्था च द्विमार्गत** इति । मार्गद्वयेनात्रानवस्थाप्रसङ्गश्च। तत्रैकेन मार्गेणाह। **प्रेर्यत्वमि-ति** । अथ तावत्परमेश्वरस्य कारणं विनैव सिद्धप्रेर्यत्वं पर-मेश्वरत्वमापततीति सिद्धस्यैव तदाधिक्येन तदा परमेश्वर-त्वात् । अन्यथा तदाधिक्याभिधानं निष्फलमेव सिद्धस्य स्यात् । यतस्तस्यापि च सिद्धेश्वरस्य सिद्धान्तरप्राप्तावनीश्व-रता । तस्य तस्यापीत्येवमनवस्थितिः परमेश्वरस्येत्यर्थः । द्वितीयेन मार्गेणाह—

व्यर्था च भविनां चेयं
निमित्तपरिकल्पना ।
वैमल्यमात्रेण पशुर्न
पतिः किमसौ भवेत् ॥ ११ ॥

येयं मुमुक्षूणां भविनां ईश्वरोऽहं स्यामिति निमित्तत्वेने-श्वरत्वेनात्मनः परिकल्पना सङ्कल्पः फलपर्यन्तः । सा व्य-र्था विगतप्रयोजना अनवस्थिता भवेत् । न कश्चित्संसार-मुक्त्यर्थं यतेतेति यावत् । अधुना **निर्मलत्वं च केवलमिति** पक्षं दूषयति । **वैमल्यमात्र** इति । पशोः किञ्चिज्ज्ञत्वा-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

त्पत्युश्च सर्वज्ञत्वादुभयविवेकेन निर्मलस्य निर्मलत्वेनाननुभूतज्ञानशक्तितया चाभ्युपगमात् किमसावपुरुषार्थरूपो मोक्षः पाषाणप्रख्यो न किञ्चित् । अयमाशयः । वक्ष्यमाणवज्ज्ञातृस्वभावत्वादेवात्मनस्तदनभ्युपगमे तन्नाशदोष एव यद्वक्ष्यति। मूढानां ज्येष्ठमल्लास्ते येषां स्वात्मा विनश्यतीति। **सिद्ध एव हि कर्तृत्व** मित्यादिपक्षं प्रतिक्षिपति ।

किमित्यकारको देवः
कारकानीकभीतितः ।
बहूनां युगपन्मुक्ते-
दुर्निवारा स्थितेव सा ॥ १३ ॥

कारकत्वं हि प्राक सिद्धाद्भगवतोऽभूत् । तत्किमिति केन कारणेन पुरुषान्तरसिद्धौ नेष्यते । पूर्वपक्षवादी कारणमाह । **कारणानीकभीतित** इति । कारणानामनीकस्समूहः अनेकत्वं तस्माद्भयं ततः । तथाहि । सिद्धस्य तावत्तदानीं लब्धचरितार्थसर्वकर्तृत्वतः यदा कर्तृत्वं परमेश्वरस्यापि तदा कर्तृत्वं विभिन्नमिति अनेककर्तृसंभवेन नवामिदमस्तु पुराणमिदमस्तु इति सर्गनिर्माणादौ वैशसं स्यात् तद्भीतेर्नेष्यते । एतत्सिद्धान्तवाद्याह । **बहूनामिति** । अचिन्त्यत्वात्कारणसामर्थ्यस्य यदा युगपद्बहवो मुच्यन्ते पुरुषाः तदा तेषां

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

प्रत्येकं चरितार्थसर्वकर्तृत्वयोगेन तुल्यतया कर्तृत्वादविकल्पस्थात् । अन्यतरव्यवस्थायाश्चासंभवात् । समुच्चयेन कर्तृत्वे स्थितैव सा सर्गनिर्माणादिवैशस्यदायिका कारणानेकत्वतो भीतिः । अथायं वादी लोभरागादिकारणत्वात्पुंसां मत्यन्यथाभावस्य तन्निश्चित्य मुक्तौ रागाद्यभावेनानेकसिद्धियोगेनापि मत्यन्यथाभावेन सर्गनिर्माणादिवैशसं परिहरिष्यति । तदस्मन्मतमेव प्रत्यवेक्ष्यतीत्याशयशेषः । इदानीं समानतान्त्रिकफलानि दूषयति ।

अथोत्पत्तावनित्यत्व-
मावेशेनास्वतन्त्रता ।
नोदाहरणसद्भावो
गुणसङ्क्रान्तिसाधने ॥ १३ ॥

यैर्मुक्तावीश्वरसमता सर्वज्ञत्वादिगुणसाम्यमुत्पद्यते पुंस इति इष्यते तन्मते उत्पत्तिमदनित्यत्वात् अनित्यत्वं मुक्तेरिति । आवेश इति । ईश्वरगुणावेशान्मुक्तिः साम्यपक्षेऽपि भूताविष्टस्येव पुंसो मुक्तावस्वातन्त्र्यमेव ईश्वरसमतेति । सङ्क्रान्तिमतापक्षं पराकरोति । **नोदाहरणसद्भाव** इति । ईश्वरगुणा मुक्तौ संक्रमन्त इति गुणसंक्रान्तिर्नैषा भवतां न तावत्प्रत्यक्षसिद्धा । अतीन्द्रियत्वात्तेषां । अथानुमानादित्युच्यते । तद-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

युक्तम् । गुणसंक्रान्तिसाधनेऽनुमाने नोदाहरणस्य दृष्टान्तस्य सद्भावोऽस्ति । यतः । न चादृष्टान्तमनुमानं प्रवर्तते व्याप्त्य-संभवात् । अत्र सङ्क्रान्तिवादी दृष्टान्तमाह ।

ननु स्वबोधसङ्क्रान्तौ
दृष्टं शब्दोपदेशनम् ।
शास्त्रे विज्ञानसङ्क्रान्ति-
र्विहिता साधकं भवेत् ॥ १४ ॥

स्वबोधसङ्क्रान्तिनिमित्तं गुरूणां शिष्यस्य विषय उपदेशेन दृष्टः । शास्त्रेऽप्यस्मिन् स्वायंभुवादावाचार्याभिषेके ज्ञानस-ङ्क्रान्तिश्श्रूयते । अथ संक्रमितो योऽयमधिकारो मया त्वयि । सकर्तव्यस्त्वया तावद्यावत्संक्रामितोऽन्यत इति । सा तु गुणसंक्रान्त्यनभ्युपगमे कथमुपपद्यत इति युष्मदागमप्रत्य-क्षाभ्यामत्र दृष्टान्तस्सिद्ध इति । सिद्धान्तवाद्याह ।

विज्ञानमुपदेशात्तु
तादृगन्यत्प्रजायते ।
सङ्क्रान्तिशब्दसादृश्ये
सद्गुरोर्यन्न हीयते ॥ १५ ॥

उपदेशान्निमित्ताच्छिष्यबुद्धौ विज्ञानान्तरमन्यदेवात्यन्त-सदृशत्वात्संक्रान्तमिवोत्पद्यते । न तु तस्यैव संक्रान्तिः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

कुत इत्याह । तदिति । तज्ज्ञानं यद्यस्माद्गुरोर्न ह्रीयते संक्रान्तिपक्षे हि शिष्य एव ज्ञानस्य संक्रान्तेः गुरावभावस्स्यात् । शास्त्रेऽपि गुरुनियोगाद्गुरुवद्व्याख्यानादौ स्वातन्त्र्यमेव संक्रान्तिपदस्यार्थः । तथैवाचार्याभिषेकप्रकरणे गुरुणा स्वायंभुवादौ प्रतिपादित इति नात्र संक्रान्तिस्सिद्धेत्याह—

गुरोर्नियोगतश्शास्त्रे
स्वातन्त्र्यं गुरुवद्भवेत् ।
सङ्क्रान्तिवचनस्यार्थ-
स्तत्रैव गुरुणोदितः ॥ १६ ॥

अथ कदाचिच्छ्रुतिस्मृतिसिद्धदृष्टान्तदार्ष्टान्तिकभ्रान्त्या सङ्क्रान्तिवादी प्रत्यवतिष्ठेत । तदपि दृष्टान्तन्यायातिदेशेन निवर्तयितुमाह—

तद्वत्साधुसमाक्रोशा-
त्पापं पुण्यं प्रजायते ।
क्षीयते च स्वकं पुण्यं
विपर्यस्ताक्षमाविति ॥ १७ ॥

तथा च स्मृतिः । 'निन्दनाद्विजसाधूनां पापानामथ सेवनात् । पापं सङ्क्रमते पुंसां स्वपुण्यमपयाति च' इति

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तथा । क्षमावति त्वनाक्रोशात्पुण्यवद्भिस्सह स्थिते । पुण्यं सङ्क्रमते पुंसां पापं याति ततोन्यत इत्यादिदृष्टान्तः । पूर्वन्यतिक्षिप्तः । यतोत्राप्यपूर्वयोः पुण्यपापयोरुत्पत्तिरेव सङ्क्रान्तिरित्युच्यते । *न तु तयोरेव सङ्क्रमः पुण्यार्जनविधीनां सहस्थितिमात्रेणैव फलापहारतो वैयर्थ्यप्रसङ्गात् प्रायश्चित्तोपदेशानर्थक्याच्चेत्याह ।

पापीयसां च संसर्गा-
त्पापमन्यत्प्रजायते ।
तथा पुण्यवतां पुण्यं
नान्यथा तदुदीरितम् ॥ १८ ॥

ननु प्रदीपो वर्त्यन्तरादौ दाह्ये संक्रमन् दृश्यत इति संक्रान्तिवादी दृष्टान्ताशङ्कां निवर्तयति—

दीपान्तरसमुत्पत्तिः
प्रदीपादिन्धनान्तरे ।
सङ्क्रान्तिस्तस्य नैवेष्टा
बुद्धवैशेषिकादिभिः ॥ १९ ॥

अत्रापि प्रदीपशिखामात्रादतिमहतो वह्नेर्वनदाहादावु-

*नन्विति पाठः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

त्पत्तिदर्शनादपूर्वोत्पत्तिरेव बौद्धाद्युपलक्षितसर्ववादिसिद्धा। न तु तस्य तावन्मात्रस्य तदेकदेशस्य वा संक्रान्तिरुपपद्यते। एतेन कस्तूरिकामोदादेः पटादौ संक्रान्तिभ्रमः पराकार्यः। संक्रान्तिवादी दृष्टान्तान्तरमाह—

गोत्वादेर्ननु सङ्क्रान्ति-
र्व्यक्त्यन्तरविसर्पिणी।
सादृश्यं यस्य गोत्वादि
तं प्रत्येतन्न शोभते॥ २०॥

तत्क्षणजातायां गोव्यक्तौ तत्सामान्यस्य तत्कालमेवोपलब्धेस्तत्क्षणात्प्रागनुपलब्धितस्तत्रासत्वाद्व्यक्त्यन्तरात्सङ्क्रान्त्यनभ्युपगमे तत्संबन्धानुपपत्तेस्त्ववश्यंसङ्क्रान्तिरेष्टव्येति। सिद्धान्तवादी प्रतिक्षिपति। **सादृश्यं यस्येति**। नास्माकं सामान्यसङ्क्रान्तिस्सिद्धा। व्यक्तिव्यतिरिक्तसामान्यस्यानभ्युपगमात्। सांख्यवद्व्यक्तित्वेनैकावयवसादृश्यस्य सामान्यरूपत्वात्तत्क्षणजातगोपिण्डस्य सङ्क्रान्त्याशङ्कासंभवात् अत्र व्यक्तितः पिण्डान्तरस्य सादृश्यस्य जातत्वेन तथात्वायोगात्। सामान्यान्तरासत्तयैव संसृतिरित्युक्तम्। तं प्रत्येतदुच्यमानं न शोभत इति व्यक्तिव्यतिरिक्तसामान्यवाद्यभिप्रायेणाह।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

स्वाश्रयव्यापकं भेदे
ऽप्याश्रये व्यज्यते हि तत् ।
विसर्पणं न यस्येष्टं
तस्य सङ्क्रमणं कुतः ॥ २१ ॥

स्वाश्रयव्यापकमिति । सर्वगतसामान्यपक्षे सङ्क्रान्त्याशङ्कासंभवात् अत्र व्यक्तिगतसामान्यमेवाश्रित्याह । भेदेऽपीति । तत्क्षणे जाते भिन्नेऽप्याश्रये व्यज्यते तद्व्यक्तिव्यङ्ग्यत्वात्सामान्यस्य व्यक्तीनां च तद्व्यञ्जकैकस्वभावत्वात् न त्वन्यतस्तस्य संक्रान्तिः । हेत्वन्तरमाह । विसर्पणमिति ।

अमूर्तस्य च सङ्क्रान्तौ
न लोको न परीक्षकः ।

निष्क्रियत्वेनामूर्तत्वेन च सामान्यस्य तैरभ्युपगमात्कुतस्संक्रमणयोग्यता । न ह्येतल्लोकसिद्धं विद्वत्सिद्धं वेति । अधुना प्रदीपसामान्ययोस्संक्रान्तिमभ्युपगम्याह ।

गुणत्वं न च सामान्ये
न दीपे तद्वृथोदितम् ॥ २२ ॥

अयमर्थः । संक्रान्तिवादिना तत्सिध्यर्थं गुणसंक्रान्तिदृष्टान्ताय प्रयतनीयम् । सामान्यस्य दीपस्य च संक्रान्ति-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

सिद्धावपि तयोरगुणरूपत्वात्तत्राद्दृष्टान्ततेति तद्वर्णनमति निष्फलमेव । दृष्टान्तान्तरं प्रतिक्षिपति—

केदारवारिसङ्क्रान्ति-
र्द्रव्यत्वादुपपद्यते ।
द्रव्य एव हि सा शक्ति-
रुक्ता सिद्धकृपाणवत् ॥ २३ ॥

केदाराभिधानस्य तीर्थपानीयस्य तदुपयोक्तृपुरुषसहभुजि पुरुषान्तरे [1]द्रव्यत्वात्सङ्क्रान्तिरभ्युगम्यत एव । निदर्शनमाह । **सिद्धकृपाणवदिति** । सिद्धखड्गो हि सिद्धादतिदूरदेशस्थितोऽपि तदभियोगात्तद्धस्तमेव संक्रामति । अचिन्त्या द्रव्यशक्तयो यतः । इत्यर्थः । अत एव चात्यद्भुतदृष्टान्त सिद्धशक्त्यनुमानतस्संक्रान्तिसाधनाच्च केदारवारि क्षेत्रपानीयमत्र व्याख्येयम् । तत्संक्रान्तेः प्रत्यक्षेण हि सिद्धेऽर्थेनानुमानं प्रवर्तत इति । तदियता संक्रान्तिवादिनो दृष्टान्तासंभवे प्रतिपादिते संप्रति संक्रान्तिवादी सिद्धान्तसिद्धमेव वस्तु दृष्टान्तीकृत्य प्रत्यवतिष्ठते ।

चितोऽचिद्वस्तुवृत्तित्वं
गुणत्वे हि समीहितम् ।

---

1 द्रव्यत्वात्संक्रान्तिरिति पाठः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नान्यथा वस्तुनः कृत्ये
प्रवृत्तिरुपपद्यते ॥ २४ ॥

चितेश्चेतनाशक्तेश्च गुणत्वेऽपि अचिद्वस्तुवृत्तित्वमभिमतं भवतां कुत इत्याह । **नान्यथेति** । अन्यथा तदविषयत्वे तस्य वस्तुनोऽचेतनस्य करणीयफलविषया प्रवृत्तिर्न घटते । एतदुक्तं भवति । कर्तरि कर्मण्यपि ज्ञानाक्रिययोरवस्थिति-रेष्टव्या । चिदनन्वितस्याचिदः प्रवृत्त्यशक्तेस्सर्ववस्तूनां च स्वात्ममात्रायामेवावस्थितेः परस्परसंसर्गाधिष्ठानासंभवेन तत्र ज्ञेयत्वेऽपि कार्यत्वाद्यात्मको विशेषो न भवेदेव । दृश्यते च कुंभकारादिशक्त्याघ्रातस्य मृदादेरचेतनस्यापि कारणवस्तुनः प्रोक्तो विशेष इति । तत्र चिच्छक्तेरवस्थितिरवश्यमभ्युप-गन्तव्या । ततः किमित्याह—

इष्यतामिति सिद्धेऽपि
परमेशगुणोदयः ।
प्रागसत्वादिदानीं तु
महाविभवदर्शनात् ॥ २५ ॥

अनयैव युक्त्या सिद्धेऽपीष्यतां परमेश्वरसंबन्धिनो गुण-स्यावस्थितिः । न तु सिद्धस्य प्रागपि स्वतस्तादृशो गुणो दृश्यत इत्याह । **प्रागसत्वादिति** । प्राक् पश्ववस्थायां परि-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मितं ज्ञातृत्वकर्तृत्वादिगुणजातं तस्याभूत् । इदानीं तु सिद्धावस्थायां तदीश्वरसमयपरिमितं श्रूयते । न च परिमितमेव तदपरिमितीभूतमिति युज्यते वक्तुम् । विरोधात् । परिणामिताप्रसक्तेश्च । न च तदानीमसतस्तस्योद्भवो युक्तः । अविनाशित्वेनास्योक्तत्वात् । तत्पारिशेष्यादीश्वरगुणस्यैव तथाभूतस्य तत्र तदा संक्रान्तिरिति पाशुपताः ॥ इयत्परवचनमाशङ्क्य पराकरोति ।

वस्त्वन्तरे न वृत्तिस्तु
केवलस्य गुणस्य हि ।
स्वगुणिन्यधिरूढस्य
तस्य स्यादुपचारतः ॥ २६ ॥

स्वगुणिनं परित्यज्य न केवलस्यास्य ज्ञानक्रियात्मनश्चिद्गुणस्य वस्त्वन्तरे प्राह्यतामापन्ने चिच्छून्ये स्थितिर्युज्यते वक्तुम् । तथात्वे हि तस्यापि ज्ञातृत्वं कर्तृता च स्यादिति सर्व एव चेतनास्स्युः सर्वे सर्वेश्वराश्च । ईश्वरेण सर्वस्य संवेदनात् । किं तु स्वगुणिस्थस्यैव तस्य तत्राश्रयान्तरे विकारवत्त्ववास्थितिं विनापि विकारहेतुत्वादवस्थानं उपचारात् दृश्यते न मुख्यतः । शक्तत्वमेव कारणत्वम् । शक्तता चान्वयव्यतिरेकाभ्यां कर्तुः कर्माणि सिद्धेति तत्र तच्छक्त्यवस्थिति-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

कल्पनं निष्फलमेव । नापि कर्तृक्रिया कर्मस्था युज्यते । प्रोक्तन्यायविरोधात । अपि तु तद्बलात्तत्रापि स्पन्दोद्भूतेस्तथात्वमुपचर्यत इति । दृष्टान्तमाह—

यथोष्णतागुणो वह्ने-
रंभस्युच्चैर्विजृम्भते ।
वह्निसंस्थस्तथेशान-
गुणस्तस्यैव जृंभते ॥ २७ ॥

औष्ण्यं वह्नेर्विशेषगुणः । न जलस्य युक्तः । भूतानां साङ्कर्यप्रसङ्गात् । पृथिव्यादीनि हि परस्परं धृतिसंग्रहपाकादिहेतुत्वैर्विभिद्यत इति नोदकस्योष्णता गुणः । अग्निसंयोगात्परिगृहीतः । अपि तु वह्निसंस्थ इति । तत्रोदकेऽनुद्भूतरूपो वह्निरुपलभ्यमानः स्वगुणस्पर्शस्थित्या स्वकार्यं दाहादिकं करोति यथा । दार्ष्टान्तिकमाह । तथेति । तद्वत्परमेश्वरसंबन्ध्यपि गुणः स्वाश्रयस्थ एवाऽश्रयान्तरे नानाविकारकारित्वेन प्रभविष्यतीति न तत्रावस्थितिकल्पनायां हेतुरस्ति ।

एवं चावेशपक्षो वा
त्वधिष्ठातृत्वमेव वा ।
पक्षो हि गुणसंक्रान्ते-
रजातो हि मृतस्तथा ॥ २८ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

परमावेशपक्षोऽधिष्ठातृपक्षो वा यः कर्तृत्वेऽपि प्रयोज्यत्वमित्यन्यत्रोद्दिष्टः। तयोर्न तथा। यथा संक्रान्तिपक्ष इत्याह। पक्षो हीति। उत्पन्न एव मृतः कुत इत्याह—

शंभुरेव हि तत्रापि
सर्वं वेत्ति करोति च।
स्वगुणेन न सिद्धस्तु
परत्वेनास्य दर्शनात्॥ २९॥

न केवलमावेशपक्ष एव। यावत्तत्रापि संक्रान्तिपक्षेऽपि स्वगुणेन सिद्धगतोपीश्वरः सर्वं वेत्ति सर्वं च विधत्ते। न तु सिद्धः। न हि पारक्येन परकर्मणाऽन्यो ज्ञानन् कुर्वन् वा दृष्टः।

तत्संपर्काच्च सिद्धोऽपि
सर्वकृत्सर्वविद्यदि।
अच्छिद्रतामपि प्राप्तं
तर्हि सर्वार्थदर्शनम्॥ ३०॥

तत्संपर्कादिति पराशङ्का। शंभुगुणसंपर्कात्सिद्धोऽपि तथाभूतश्चेत्। पराकरोति। अच्छिद्रतामिति। अच्छिद्रतामपि

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

मायादीनामपि ईश्वरज्ञेयत्वेन तत्संपर्कस्याविशेषाद्भवेत्तदिति तेषां सर्वज्ञत्वप्रसङ्गः ।

प्रागसत्वमसिद्धं च
दृष्टं ज्ञानाक्रियाबलम् ।
उत्कृष्यमाणमुत्कर्षा-
द्व्यञ्जकस्थानतस्स्फुटम् ॥ ३१ ॥

प्रागसत्वमिति परोपन्यस्तयुक्तिनिरासः । यदुक्तं प्राग्भवावस्थायामात्मनस्सर्वज्ञत्वादिसामर्थ्यस्यासत्वमिति । तदसत्वमसिद्धं। यतस्तेषां प्रागपि ज्ञानाक्रियाबलं स्वव्यञ्जककार्यकरणादिस्थानतो दृष्टमिति यथैवात्मनो यत्र स्वव्यञ्जकं शरीरं तत्र तत्रात्मप्रतिपत्तितो [1]व्यापकत्वं प्रतीयते । तथैव तद्गुणानां सत्वं व्यापकत्वं च सिद्धमिति भावः । यथैव प्राक् सिद्धं तथैव व्यञ्जकस्यालोकादेर्विषयाभिव्यक्तिं निर्वर्तयतस्सिद्धाञ्जनादेर्बुद्धीन्द्रियशक्तिमुत्तेजयतश्शिल्पवेदनादेः कर्मेन्द्रियकौशलं कुर्वतो योगाभ्यासादेश्चित्तं जयतो यथायथमुत्कर्षेण ज्ञत्वकर्तृत्वात्मकं स्वबलमुत्कृष्यमाणं दृष्टम् । किमितीत्याह—

1 ता व्यापकत्वमिति पाठः ।

Center for Shaiva Studies, Pondicherry Collection

Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

मोक्षे हि व्यञ्जकं दृष्टं
सर्वार्थं शांभवं बलम् ।
तत्समत्वमतस्तस्य
भवत्केन निवार्यते ॥ ३२ ॥

मुक्तावीश्वरलक्षणस्य व्यञ्जकस्योत्कृष्टतरस्य योगाद्यज्ञस्यापि तथाभावसिद्धौ तस्येश्वरसमगुणाभिव्यक्तेरीश्वरसमत्वं 1भवत्केन निवारयितुं पार्यते । अभिव्यक्त्यनभिव्यक्ती चाऽऽवरणभावाभावकृते तस्य । न तु स्वरूपान्यथात्वकृते परिणामित्वापादकेन पराहतत्वात् । एवं स्वपक्षे दूषणमुद्धृत्य परस्य दोषान्तरमाह—

आश्रयान्तरसङ्क्रान्तिः
पूर्वाश्रयविवर्जनम् ।
विना नैव प्रसिद्धा स्या-
त्त्यागे पूर्वस्तु निर्गुणः ॥ ३३ ॥

संक्रान्तिर्हि पूर्वाश्रयत्यागेनाश्रयान्तरे सूर्यादीनां दृष्टा । तद्वदत्रापि पूर्वाश्रयत्यागाभ्युपगमे स पूर्वः परशिवस्सर्वगुणरहितो भवेत् सिद्ध एव तद्गुणसंक्रान्तेरिति । ननु स्वाश्रये

1 तत्तत्केनेति पाठः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भवतः तत्र वाश्रयान्तरे संक्रान्तिः प्रदीपप्रकाशस्येव तस्य भविष्यतीत्याह —

गच्छतस्तं परित्यज्य
गीतं प्रसरणं हि तत् ।
ततश्चा* परिणामित्वा-
दोषानिकं समापतेत् ॥ ३४ ॥

प्रदीपप्रकाशस्य हि प्रदीपोत्पत्तौ कृते स्वाविरुद्धतमोनिवर्तनेन तत्र तत्र देशे प्रसरणं मतम् अंभःप्रवाहस्येव परिणतिधर्मत्वायुज्यते । परमेश्वरगुणस्य च यद्रूपं परिणामि तदचेतनं मृदादि दृष्टमित्यचैतन्यादिवक्ष्यमाणदोषव्रातप्रसङ्गः ।

यथा कथंचित्संक्रान्तौ
व्यवस्था द्रव्यवर्तिनी ।
सर्वमानप्रसिद्धा सा
[1]विरुद्धा गुणकारिता ॥ ३५ ॥

अथवा पराहतयुक्तिकोऽपि संक्रान्तिवादी संक्रान्त्या [2]क्रान्तापस्मारेण मुच्यत इति संक्रान्त्याग्रहादिच्छेदात् ।

---

* परमेश्वरगुणस्येति शेषः । 1 विशुद्धेति पाठभेदः । 2अग्रहा-वस्तारेणेति पाठः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

एवमपि गुणकारिता गुणैश्वर्यादिप्रवर्तिता संक्रान्तिस्सा विरुद्धा। द्रव्यसंक्रान्तिरत्र युज्यते। द्रव्याणां हि संक्रान्तिः प्रसिद्धा न गुणानां यतः। ततश्च द्रव्यत्वमीश्वरगुणानां प्रसज्यत इति यावत्।

जातित्वेनैष दोषश्चेन्न
ज्ञानादिगुणा हि सा।
द्रव्यत्वे गौरवं क्लृप्ते
ज्ञानाद्याश्रयतो भवेत्॥ ३६॥

अस्तु तर्हि सर्वज्ञत्वादीनां धर्माणां सिद्धेश्वरानेकगुणव्यक्तिगतत्वेन गुणजातित्वम्। तस्मिन् सति तस्याः प्राप्तसिद्धभावे पुमन्तरेऽपि नवमालतीशौक्ल्यवत्संक्रान्तिर्भविष्यतीत्येवं संक्रान्तिसिद्धौ न दोषः कश्चिदिति परमाशङ्क्य निवर्तयति। न ज्ञानादिगुणा हि सा। न तेषां संक्रान्तिस्सिद्धेति न किंचिदेतत्। मालत्यादिगुणानामपि तदोत्पत्तिरेव यतः। अथायं वादी सर्वज्ञत्वादिगुणाश्रयस्येश्वरद्रव्यैकदेशस्य संक्रान्तिमिच्छेत् तथाप्ययुक्तमित्याह। द्रव्यत्वे इति। एवं द्रव्यत्वेऽभ्युपगम्यमाने ज्ञानाद्याश्रयत्वेन या कल्पना तस्या गौरवं गरीयष्ठं प्रमाणमभ्युपगतं भवेत्। तथाहि। अनेकधाऽनेकद्रव्यसमूहरूपत्वमीश्वरस्य तस्य च द्रव्यस्य

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

तत्तत्सिद्धप्राप्तौ ततस्संक्रान्तिस्तस्य च ज्ञानाद्याश्रयत्वकल्पनमप्रमाणकमनन्तं कल्पितं स्यात् । संक्रान्तिवादी सिद्धान्तवादिमोक्षे दोषमाह—

नन्वेवं पौरुषो मोक्ष-
स्त्वभिव्यक्तौ न शांभवः ।
नन्वेवं शांभवो मोक्ष-
स्संक्रान्तौ न हि पौरुषः ॥ ३७ ॥

नन्वेवं यदि गुणास्त एव मुक्तौ पुंसो व्यज्यन्ते 'तदात्मा ज्ञातव्य' इत्यादिवत्पुरुषकर्तृक एव मोक्षो भवतामपि प्रसक्तः । न त्वीश्वरकर्तृकः तच्छक्त्यसंस्पर्शेन तस्य तत्र कर्तृत्वायोगात् । संस्पर्शे हि संक्रान्तिरेव स्यात् । सिद्धान्तवादी तं प्रत्याह । नन्वेवं शांभव इति । त्वत्पक्षेऽपि न कश्चिन्मुक्तः परमेश्वरगुणस्य प्राक्स्थस्यैव तत्र संक्रान्तेरपुरुषसंबन्धितया मोक्षस्य । मत्पक्षे तु द्वयमपि युज्यते इत्याह—

पौरुषः पुरुषाधार-
शांभवश्शंभुनिर्मितः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

[library stamp]

द्वयं संपूजितं व्यक्तौ
संक्रान्तावेव काविति ॥ ३८ ॥

पौरुष इति । पुरुषे कर्मणि समवेतः परमेश्वरकर्तृकश्चेति कर्तृकर्मलक्षणकारकद्वययोगतो भेदेन व्यपदिश्यते मोक्षः । ओदनस्य पाको देवदत्तस्य पाको वेतिवत् । न च संक्रान्तिं विना कर्तृत्वं नोपपद्यत इति युक्तम् । सिद्धान्तवाद्येव स्वपक्षे स्वसाध्यतामाह —

व्यक्तिरेवेष्यतां सा हि
प्रसिद्धा व्यञ्जकैस्सह ।
तस्यामपूर्वं दृष्टं वा
न किंचित्परिकल्प्यते ॥ ३९ ॥

व्यक्तिर्ह्यात्मगुणानां व्यञ्जकैस्सह सुसिद्धेत्युक्तम् । सैव मोक्षेपीष्यतां । ममैव दृष्टान्तानुसारिणी कल्पना भवति । न च त्वत्पक्ष इव दृष्टान्तपर्येषणादिकमत्र प्रसज्यत इति । संक्रान्तिवाद्याह —

नेष्यते येन पूर्वत्र
दृष्टोऽशुद्धो हि पुंगुणः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

पुमानपि तथाभूतः
प्रकृष्टस्स किमीप्सितः ॥ ४० ॥

सतो ह्यभिव्यक्तिस्तद्रूपप्रत्यभिज्ञया घटादेरिव दीपादिना । इह तु सिद्धावस्थातः पूर्वमशुद्धः किंचिद्विषयः पुंसां गुणस्सिद्धः । मुक्तौ तद्विलक्षणो ह्यत्यन्तशुद्धः परमेश्वरसमश्शूयत इति तयोर्भेदात्पूर्वं प्रत्यभिज्ञानासंभवतो मुक्तावभिव्यक्तिर्नेष्यतेऽस्माभिः । सिद्धान्तवाद्याह । पुमानपीति । भवद्दृष्ट्यापि पुमानशुद्धः येनेदानीं हि परमेश्वरगुणसंक्रान्तिपात्रीभूतः । अत्र पराभिप्रायः ।

स चेच्छोधनसंसिद्धो
गुणा नैवं किमीप्सिताः ।
अणुस्तादृग्गुणोऽद्यापि
कथं शुद्धस्स सर्वथा ॥ ४१ ॥

अथाशुद्धोऽप्यसौ तदानीमीश्वरव्यापारेण दीक्षादिना शोधकेन शुद्धो भवद्भिरिष्यते । यद्येवं तद्गुणाः कथमेवं शुद्धास्सर्वविषया नेत्याह—गुणा इति । न च तद्गुणाः प्राक् न सन्तीत्युक्तम् । सतां तेषामज्ञानलक्षणावृतस्य तमस इव

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

निवृत्या अभिव्यक्तौ *सकला कलानिवृत्तिकृते शुद्ध्यशुद्धी परगतत्वान्नाभेदबाधिके इति नाभिव्यक्तिमोक्षप्रतिक्षेपो युक्तः। न च संक्रान्तिपक्षे कदाचिदपि पुंसश्शुद्धिरस्तीत्याह। अणुरिति। यादृग्गुण एव पूर्वं पश्ववस्थायामणुरात्माभूत्तादृगशुद्धस्वगुण एवाद्यापि मोक्षे तद्गुणानामतिशयो भवद्भिरभ्युपगम्यत इति कथं शुद्धस्सर्वथा। नैव, इत्यर्थः। तस्य तदात्मगुणानां शुद्ध्यनभ्युपगमेपीश्वरगुणसंक्रान्त्यधिकरणस्य द्रव्यमात्रस्यैव शुद्धिरस्माभिरिष्यत एवेत्यत्र सोपहासमाह—

द्रव्यप्रिया भवन्तो वै
ज्ञाता नैव गुणप्रियाः
क्षणं वा वैदुषी येन
न क्लृप्तः शांभवः पुमान् ॥ ४१ ।

अयमत्र भावः। परमेश्वरगुणसंक्रान्तावप्यात्मदृष्टस्य द्रव्यस्य तदा किमशुद्धास्ते गुणास्सन्ति वा न वा। न तावन्न सन्ति। ज्ञानाक्रियानाशपक्षस्य निषेत्स्यमानत्वात्। सन्ति चेत् किं पूर्ववदसर्वविषयास्सर्वविषया वा यद्यसर्वविषयास्तदाऽपि पशुरेवासावशुद्ध इत्युक्तम्। अथेश्वरगुणसं-

*सकलासकलेति पाठभेदः।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

क्रान्तौ सर्वविषया: । यद्येवमस्मद्दर्शनगुणशुद्धिरेवेति कथमात्मद्रव्यमात्रशुद्धिप्रियता गुणशुद्ध्यप्रियता च भवतामुपपद्यते। गुणपक्षपातश्च महतां युक्त इत्युपहास: । दोषान्तरं संक्रान्तिवादिनामाह—— क्षणं वेति विस्मृतं चैतद्भवतामीश्वराद्वैतानाश्रयणं । येन शंभुसंबन्धी तत्परिणति: पुमान्न कल्पित: मुक्तौ तावत्तद्गुणत्वेन तदद्वैतमभ्युपगतप्रायमिति भाव: । तदियता संक्रान्तिपक्षप्रतिक्षेपं विधायाधुना सर्वनाशपक्षं तिरस्करोति ।

बालत्वे यौवने दृष्टान्
वृद्धोऽर्थान्संस्मरेद्दृढम् ।
जन्मप्रमाणयोरन्त-
स्स्थैर्यं पुंसस्ततो भवेत् ॥ ४२ ॥

यतो बाल्याद्यवस्थानुभूत्या तान् संस्मर्तुं शक्तो दृष्टस्तदा स्मृतिदर्शनादात्मनस्स्थैर्यमभ्युपगम्यते । यदि हि प्रतिक्षणमन्योन्यश्च द्रष्टाऽनुभवेत् तदान्येनानुभूतेऽर्थे स्मृतिरन्यस्य न भवेत् चैत्रमैत्रयोरिव । दृश्यते चात्र कालान्तरानुभूतार्थस्मरणं कालान्तरे इत्यतस्स्थैर्यं* नन्वनुभवस्मरणयोस्ताव-

* अभ्युपगन्तव्यमिति शेष: ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्थिरात्मानुभववादिनापि त्वया भेदोऽभ्युपगतः । न हि तवापि स्मरणमेवानुभवः । सर्वचित्तवृत्तीनामभेदप्रसङ्गात् । भेदेऽपि तयोरतीतानुभववृत्तिकृतचित्तसंस्कारेणेदानीं वृद्धस्य स्मृतिः तदनुभवविषया तदनुभूतार्थविषया वा भवतापीष्टैव आत्मनि विकारित्वप्रसङ्गतः संस्कारानभ्युपगमात् । चैत्र-मैत्रचित्तप्रवाहयोस्तु परस्परं संस्कारजननकारणत्वाभावा-देकचित्तप्रवाहपतितस्यैवानुभवस्य संस्कारसाधनेन स्मृतेरु-त्पत्तिस्त्वयाऽभ्युपगतेति कथमत्राभेदः प्रतिपद्यते । अथ चित्तवृत्तिव्यतिरिक्तस्यात्मनोऽत्राभेदःसाध्यते । तदयुक्तम् । चित्तवृत्तिव्यतिरेकेण तस्यानुपलंभात् । एकमेवेदं संवेदनं हर्ष विषादाद्यनेकरूपं दृश्यते यतः अथासंवेदनस्यात्मनोऽनुमे-यस्यात्र भेदः प्रतिपाद्यते तदपि तेनादृश्येन सह कस्यचि दपि व्याप्त्यसिद्धेरयुक्ततरम् । न च कार्यान्यथानुपपत्त्या ऽनुमीयते । तत्कार्यस्य स्मृत्यादेः प्रोक्तवदुपपत्तेः कश्च तस्या-नुमातेत्यपि वक्तव्यं । न चित्तं । अचेतनत्वेन तस्याभ्युपग-मात् । अथाचेतनस्यापि तस्य तत्संपर्काच्चैतन्यमित्युच्यते । तदयुक्तम् । चेतनसंपर्काद्धयचेतनस्य चेतना भवतीति न चिद्रूपता । चिद्रूपत्वे तु स एवात्मा प्रकाशकत्वादिति किम-नेन । न च तस्याप्यनुमितस्यात्मता युक्ता । प्रकाशवत्प्रका-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

श्ययोरात्मपररूपत्वात्। यो हि स्वयमाभासते स एवात्मा यस्तु तेन प्रकाश्यते स एव तस्य प्रकाश्योऽपरः इत्यसङ्करः। आत्मपरयोरिव रूपं न सङ्कीर्यते सर्वस्य परस्यापरस्य चात्मत्वात्। न च प्रकाशसिद्धौ प्रकाश्यसिद्धिरस्ति। येनात्मनः परोक्षत्वेऽपि न चित्तप्रकाशोऽभ्युपगम्यत इति। एवमायातमांश्यमशेषस्य जगतः अथात्मनोऽसिद्धावपि चित्तप्रकाशोऽभ्युपगम्यते तर्हि प्रकाशात्मिकचित्तवृत्तिरुदयव्ययवत्येवात्मत्वे नेष्यतां किं तद्व्यतिरिक्तस्यात्मनोऽत्यन्तासिद्धस्यात्र नित्यत्वसाधनेनेति। सत्यमनुभवो न स्मरणं। सत्यं चैकप्रवाहरूपितादनुभवादिवृत्तिसामर्थ्याहिताच्चित्तसंस्कारात्स्मृतिसंभवः न प्रवाहान्तरस्थात्। इदं च सत्यमेव यच्चित्तव्यतिरेकेणात्मनस्स्वसाक्षिकस्याभावाभिधानं न ह्यनुभवमपह्नुत्याननुभवव्यवस्थापकानां व्यवस्था युक्तिमती। स एव व्यवस्थापकः यदपह्नवे च न किंचिन्नापह्नुतं नाम तत्। स एवानपह्नवनीयस्वभावो निरूप्यतां। किं प्रतिक्षणं पूर्वः पूर्वः पूर्वोत्तरक्षणाभ्यां भिन्नः क्षणमात्ररूपावभासो ग्राहकः प्रकाशते अथ सर्वदैव। भिन्न इति तत्राद्यं स्थिररूपः प्रकाशस्सर्वदैव ग्राह्योपाधिभेदव्यत्यासादितात्मभेदः कालत्रयेऽपि तिरस्कृतस्वप्रागभावप्रध्वंसाभावः नानाविधप्रमाणादनेकचित्तवृत्त्युदय-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

ऽयसंवेदनेष्वेकमपि तद्ग्राहकस्थैर्यवेदनो वृत्त्यन्तरेष्वपि अविलुप्तज्योतिस्सुषुप्त्यादावप्यखण्डितस्वसंवित् सततमेव स्वप्रकाशत्वेन गम्यत्वादात्मपदप्रतिपाद्यः प्रतिपुरुषं स्वसंवेदनसिद्ध इति। किमत्रान्येन साधनेन तामेवात्मसंविदमभिन्नामनपायिनीं चाश्रित्य सर्वैः कालान्तरफलानि कर्माण्यारभ्यन्ते क्षणिकत्वे तु तस्यास्सर्वव्यवहारप्रत्ययस्तमयं सर्वज्ञानानां क्षणमात्रवेदनोत्तरध्वंसतः क्षणान्तरे संभवाभावात्कः प्रवर्तेत कुत्र किमर्थं वा यतः न हि क्षणात्मवादिनो नाहं न ममेति पश्यतः प्रवृत्तिर्घटत इति निरीहं स्वरूपनिष्ठं प्रकाशमात्रं हेयोपादेयबुद्धिविकलं मिथ्याज्ञानाविचारबोधाद्यनेकज्ञानशून्यं जगद्भवेत्। स्थिरग्राहकप्रकाशपूर्वत्वादेवमादेस्सर्वस्येत्यनपह्नवनीयोयं प्रकाशो व्यवहारहेतुभूतः कालान्तरभाविफलप्रवृत्तिकारणं *सर्वदैव स्यात्। सत्यं ग्राहकोऽप्ययं एकरूपः स्थिरग्राहकप्रकाशस्सर्वव्यवहारसंपादनक्षमोऽनपह्नवनीय एव स पुनर्न स्वसंवेद्यः अपि तु ग्राहकक्षणप्रवाह एवानुभूयमाने तस्माद्दृश्यदर्शनभ्रान्तैर्विकल्पेनारोप्य प्रकाश्ये ततः प्रवाहस्यैवैक्यमिति न पुनर्भ्रम एव। विषयवैलक्षण्येन कर्मतया तदैक्यस्य संवेदनात्। यदि ह्येतदारोपितं स्यात् तदारोपिका-

*सर्वैरेवेति पाठः।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

भिमतस्य स्वत: क्षणमात्रध्वंसित्वेनाप्रतिभासनात् । तत्प्रतिभासित्वे ह्यात्मत्वोपपत्ते: । आरोपस्य पूर्वापरपरामर्शरूपत्वेन स्थिरबोधनिवर्त्यत्वात् । न च क्षणात्मनोऽपि युगपत्पूर्वापरयुक्तदीर्घविषयत्वतस्समारोपकत्वम् । अयोजनात्मकत्वेनाविकल्पकत्वादलातचक्रादिप्रतिभासवत् । अत एव युगपत्सर्वार्थविषयत्वेऽपि योगिज्ञानमविकल्पककल्पमित्युक्तम् । योजितविषयं तदिति चेत्सर्वेषां क्षणिकत्वेन योजनानुपपत्तेर्न किंचिदेतत् । अत एवानेकेषामपि क्रमभाविनां विकल्पक्षणानां नारोपकत्वमित्यारोपासंभवात् तदङ्गताविकल्पनात् न च ग्राहकात्मन्येव वक्तुं शक्यते । येन स्वात्मस्य विकल्पको विकल्प: । अत एवास्याहं प्रत्ययविषयताऽपि न संभवति । अपि त्वहंप्रत्ययप्रकाशरूपतैव तदापि तेन रूपेण स्थिरतयैवाहमवभासनात् । न हि कालत्रयेऽपि ग्राहकात्मनो ध्वंसस्संवेद्यत इत्युक्तम् । यस्य हि प्रागभावस्स उत्पन्न: यस्य हि पुंस: उत्पत्तिस्स नष्ट: अहंप्रत्ययस्य पुन: पूर्वोत्तरयो: कोट्योर्नास्त्यभाव: । संवित्प्रतिक्षणमुत्पन्ना निरूढा भवेदिति न शक्यते वक्तुं न वा स्वसंवेद्यस्संविद्धर्मो भवतीति वक्ष्याम: । तत्स्थूलसूक्ष्मयोरिव स्थिरक्षणिकयो: परस्परविरुद्धरूपत्वाद्विद्युदादौ क्षणिकत्वं प्रमाणसिद्धं सदक्षणिकत्वं

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

व्यावर्तयति । यथैवमत्र स्वात्मारोपासंभवेन स्थैर्यमवभासमानमसंशयं क्षणिकत्वं व्यवच्छिनत्तीति युक्तं ; न च स्वसंवेदनस्य बाधस्संभवति । येन भ्रान्तता भवेदिति वक्ष्यामः । न च प्रमाणसिद्धस्य बाधकं विनाऽन्यथाभ्युपगमो मतिमावर्जयति विपश्चितां । स्थिरस्यार्थक्रियानुपपत्तिरेव बाधकमिति चेन्न । तदनुपपत्तेस्तत्र निषेत्स्यमानत्वेनाबाधकत्वात् । तदत्र स्वप्रकाशे स्वचित्तव्ययोदयसाक्षिणि स्थिररूपे ह्यात्मनि ग्राहके स्वसंवेदनात्स्वकर्तृत्वं प्रोक्तवदात्मसंवित्तिप्रोद्धारफलं पराभिहिततदभावसाधनहेतुव्राततिरश्चीनतया हेतूक्तं न तु स्मृतिः । सा ह्यतीतादनुभवाद्भिन्नैव । स्मर्ता तु न भिद्यते । तस्यैव पूर्वानुभवितृत्वेन तदा स्वसंवेदनादिति तदभेदात्तत्राभेदोपचारः न वस्तुतोऽभेद इत्यलं अतिसूक्ष्मानुभवविचारेण मुग्धमतितपस्विजनमनःखेदजनकेन । एवं जन्ममरणयोर्मध्ये पुंसस्स्थैर्यं प्रतिपाद्याधुना यैर्भूतेभ्य एव ज्ञानस्योत्पत्तिरित्युक्तं तान् प्रति जन्मनः पूर्वं तत्सत्तां साधयितुमाह—

जन्मान्तरानुभूतेऽर्थे
स्मृतिरन्यस्य संभवेत् ।
अशनाय भवेत्सा च
स्तन्यं प्रत्युपसर्पणात् ॥ ४३ ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

यदि हि शरीरेण सह चैतन्यमुत्पद्यते तदा तदहर्जातस्य बालकस्य बुभुक्षितस्याशनाय भोजनार्थं स्तन्यं प्रति क्षीरप्राप्तये प्रवृत्तिनिगरणात्मको व्यापारो न स्यात् एतच्चोपलक्षणमन्येषां स्थानकरणाभिघातादीनां । यदाहुः । 'आद्यं करणविन्यासः प्राणस्योर्ध्वं समीरणं । स्थानानामभिघातश्च न विना पूर्ववेदनामिति ।' दृश्यते च प्रवृत्तिः । सा जन्मान्तरपूर्विकां स्मृतिं तदा गमयति । ननु यथा जृंभाद्युद्भवो बालस्य जातिधर्मतया वस्तुशक्तित एव भवति एवमेतदपि भविष्यतीत्यसमंजसमेतत् । अवगमपूर्वकत्वादस्य सर्वस्य ह्यवगमं विना नोद्भवः । केशनखादेरिव तस्य जृंभादेर्जातिधर्मता युक्ता । क्षीरनिगरणस्यत्विच्छाजन्यप्रयत्नविशेषसाध्यत्वेन तद्युत्वान्न जातिधर्मता । क्षीरं हि तत्क्षणजातेनापि बालेनार्थितया स्तनात्पूर्वं प्रयत्नविशेषेणाकर्षणात् । आकृष्यते च तेन मुखमापूर्यं न तद्वमति अपि तु तृप्तिलक्षणफलावधि निगरणमपि तथा तथा निगरं दृश्यते । न च यथा यथा प्राणाक्षयवायुरोधस्तस्य जायत इत्येवमादिहिताहितप्राप्तित्यागनिमित्तस्य प्रयत्नविशेषकार्यस्य दर्शनात् बालानां हिताहितबुद्धिं ज्ञात्वाऽनुमितपूर्वानुभूतहिताहितस्मृतिसिद्धिः । अत्रैवाभ्युपगममाह ॥

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

जातिस्मराश्च दृश्यन्ते
कुर्वन्तः प्रत्ययं जनाः ।
न चान्येनानुभूतेऽर्थे
स्मृतिरन्यस्य संभवेत् ॥ ४४ ॥

भूतपूर्वजन्मस्मर्तारो जातिस्मराः प्रत्यक्षा एव । यदि नाम स्मृतिर्जन्मान्तरविषया दृष्टा वा अनुमिता वा ततः किमित्याह— **न चान्येनेति** । अनुभवस्मरणयोरैकाधिकरण्यं पूर्वमेव प्रतिपादितमिति जन्मनः प्रागपि सत्तासिद्धिरनुभवितुः । ततोऽनेनाऽपि सिद्धेन किमित्याह ॥

एवं चानादिका पुंसा-
मुन्नेया जन्मपद्धतिः ।
अनादेर्वस्तुनो मानं
विनाशित्वे न संभवेत् ॥ ४५ ॥

प्रतिजन्म पूर्वव्यतीतजन्मसंस्कारपूर्वकव्यवहारदर्शनाज्जन्मप्रतिबन्धः पुंसस्सिद्ध इत्यनादित्वं तेषां सिद्ध्यति । न तु भूतेभ्य एवोत्पादित इति । ततश्चानादित्वात्सिद्धात्सर्वनाशपक्षनिषेध इत्याह— **अनादेरित्यादि** । विनाशित्वे विनाशित्वनिमित्तमनादेर्वस्तुनः प्रमाणं न संभवेत् । प्रमाणाभावे-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नात्र विनाशासंभवो लक्ष्यते । तेनानादेर्वस्तुनो विनाशित्वं न संभाव्यत इत्यर्थः । उत्पत्तिमतां ह्यनित्यत्वं सिद्धव्याप्तिकत्वात्सिद्ध्यति । नानुत्पत्तिमतां यतः । अनुत्पत्तिधर्मा चात्मेत्युक्तं । स्यादेतत् । अनादेरात्मनो विनाशित्वे प्रमाणमस्ति अर्थक्रियाकर्तृत्वं । तथा हि नित्यस्यार्थक्रियाकर्तृत्वं स्वभावः । तदभावत्वेऽवस्तुत्वप्रसङ्गात् । स च स्वभावस्तस्यैक एव । नानास्वभावत्वे हि तस्यापि नानात्वं स्वभावभेदलक्षणत्वात् । भावभेदस्यैकस्वभावत्वे च सर्वदैव स्वनिवृत्त्या सर्वार्थक्रियाकर्तृत्वस्वभावत्वादेकस्मिन्नपि[1] क्षणे सर्वस्वकार्यकरणप्रसङ्गात्कार्ययौगपद्यं भवेत् तत्स्वभावस्य तदाऽपि भवादिति क्रमेण कार्योत्पादाभावः । न च क्रियाकालनियमो भवेत् । द्वितीयस्मिन्नपि क्षणे तत्स्वभावत्वे तथैव कुर्यात् द्वितीयक्षणकृताश्चार्थक्रियाः पूर्वमेव कुर्यात्पूर्वक्षणकृताश्च पुनर्द्वितीयस्मिन् क्षणे इत्याद्यनवस्थितेरेकस्वभावस्य युगपदपि कार्योत्पादानुपपत्तिरिति सा तत्रानुपपद्यमाना प्रकारान्तराभावाद्वस्तुधर्मत्वेन तत्प्रतिपक्षेषु क्षणमात्रध्वंसिषु भावेषु विश्राम्यतीति क्षणिकत्वं भावानां । क्षणिकत्वे तु स पूर्वः पूर्वार्थक्रियाकर्ता ध्वस्तोऽन्यश्चापूर्वोऽपूर्वार्थक्रियाकर्ता समुत्पद्यत इति । न क्रमेणानुभूयमानाया अर्थक्रियायाः कदाचिदनुपपत्तिरिति न दोषः । ततश्चात्मनोऽप्यर्थक्रियालक्षणत्वमेव

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

विनाशित्वे प्रमाणमिति विनश्वर आत्मेति सिद्धं। तदेतद-युक्ततरं। स्वात्मनो ग्राहकस्य स्थिरत्वेनैव संवेदनात्। न च तस्मिंश्च क्षणिके स्वभावनिवृत्त्यादेः क्षणविचारस्याप्यत्रा-संभव इत्यप्ययुक्तमेव। न च भ्रान्तिघटितात्स्थैर्याद्भविष्य-तीति वाच्यं। स्वसंवित्तौ भ्रमाभावात्। ततश्च ग्राहकस्थैर्या-वभासो विचारदर्शनान्यथानुपपत्तिलक्षणेन चैकयानुमानेन स्वसंवादोर्थक्रियानुपपत्तिघटितस्य क्षणिकत्वस्य बाधकं प्र-माणं। ननु स्थिरस्यार्थक्रिया नोपपद्यत इत्युक्तं। तदप्य-युक्तं। तस्यह्येकस्वभावत्वेऽपि विशिष्टसहकारिसन्निधौ का-र्यकरणैकस्वभावत्वात्तत्सन्निधान एव करोति न प्राक् त-त्सन्निधानाभावादिति न क्रमेण कार्यानुपपत्तिः। अथ कुसुलस्थस्य बीजस्य क्षित्यादिसहकारिसन्निधावङ्कुरजनकस्वभा-वस्य सामर्थ्ये सत्यसति वा तज्जननं सामर्थ्ये सत्यसति च सहकारिणि तज्जननसामर्थ्ये वा सहकारिसन्निधौ कार्य-करणैकस्वभावत्वात्तत्सन्निधानेप्यसामर्थ्यमेकस्वभावत्वात्स-हकारिभ्यस्सामर्थ्यलाभे वा पूर्वमसमर्थः पश्चात्समर्थ इति स्वभावभेदाद्भेद एव तस्येति नैकता। अत्रोच्यते। समर्थो-ऽप्यसौ तत्सन्निधान एव कार्यं करोति तथास्वभावत्वान्ना-न्यदा। ननु समर्थश्चेत्किमिति सन्निधानमपेक्षते तथा स्वभा-वत्वादित्युक्तं स्वहेतुभिस्स्वभावाद्वा स तथाभूतस्वभाव एव

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

स्वावो भवति । यस्समर्थोऽपि तथाविधसहकारिसन्निधौ कार्यं करोति नान्यदेत्यत्रान्वयव्यतिरेकावेव स्थिरवस्तुनि विषये प्रमाणं न च स्वभावा भावानां पर्यनुयोगमर्हन्ति । न हि किमर्थं वह्निर्दहति न जलमित्यत्र पर्यनुयोगश्शक्यते कर्तुं । अथ सहकारिसन्निधौ जनकाद्भिन्नस्तस्य स्वभावो जननाभावादेवेत्युच्यते तदाऽपि सहकारिसन्निधिकार्यकरणैकस्वभावत्वात् । तत्सन्निधौ तु स एवेति न भेदः । न ह्यस्मात्स्वभावात्कालत्रयेपि प्रच्यवते भावः । सहकार्यसान्निधानात्तु न तदा तत्कार्योद्भव इति तत्सन्निध्यसन्निधी परं भिद्येत न तु वस्तुभेदः । ननु यदि सहकारिगतौ सन्निध्यसन्निधी तर्हि सहकारिणो भेदं कुरुतः विरुद्धस्वभावत्वात् न तत्राऽपि विरोधः तस्याऽपि सन्निधापकः तस्य सहकारिणि सन्निधिस्वभावत्वात्तस्यापि अन्यसहकारिसन्निधाविति नानियमः । स्वभावनियमस्वाद्भावानां वैचित्र्यस्येति सहकारिणामपि क्षित्यादीनां बीजादिकारणसन्निधौ तत्कार्यकरणस्त्वसौ तत्सदृश एव स्वभावः । येन तत्सान्निधान एव कार्यं कुर्वन्नान्यदेति सर्वेषां तत्कारकत्वस्वभावः परस्परसन्निधानापेक्ष इति सर्वे कारकास्सहकारिपदवाच्या नैकैकः । न च तेषां स्वभावभेदः । सर्वेषां च सामर्थ्येऽपि न कार्यानेकप्रसङ्गः । परस्परसन्निधौ च ..देककार्यनिवर्तनस्वभावत्वा[1]त्क्रमेण ना-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

नाभूतार्थक्रियाकरणेऽपि नानाभूततत्सहकारिसन्निधौ नानाभूतानेककार्यकर्त्रैकत्वस्वभावत्वात्क्रमेण नानाभूतार्थक्रियाकरणेऽपि न स्वभावभेदः। यथैकस्यैव चैत्रस्य लवनपचनभोजनाद्यनेककार्यकर्तुश्च तत्तद्दात्रादिसहकारिसन्निधौ लवनादिकार्यकर्तृस्वभावत्वात्क्रमेण लवनादिभेदेऽपि न स्वभावभेदः तथाभूतस्वभावस्य तत्र क्रमेणैव भावात्। प्रदीपस्य चैकस्यैव वर्तिदहनतैलक्षपणस्वज्ञापनाद्यनेककार्यनिर्वर्तकैकस्वभावोऽभ्युपगतो भवद्भिः। न तु कार्यभेदेन स्वभावभेदः। एकस्यैव विशिष्टस्वभावस्यानेककार्यनिर्वर्तनविरोधाभावात् तद्वदत्राभ्युपगन्तव्यं। तत्तत्सहकारिसन्निधौ तत्तदनेककार्यकरणस्वभावावियोगात् सर्वदैव स्थिरस्यापि भावस्य सहकारिसन्निधानस्य पूर्ववत्क्रमिकत्वात्क्रमेणानेककार्यनिर्वर्तनेऽपि न भेदस्वभावो भेदादिति स्थिरस्यार्थक्रियाकर्तृत्वं क्रमेण युज्यत इति नार्थक्रियासंभवस्यात्र बाधकत्वं। तस्यास्थिरेषु भावेषु संभवात्। यथा च क्षणिकस्यार्थक्रिया न संभवति तथा विवेचितमस्माभिः। आगमविवेक इति तत एवावगन्तव्यं। तत्र बाधकाभावात् स्थैर्यं भावानां प्रत्यक्षसिद्धमबाधितमेव। तत्रैषां हेतुः प्रमाणेन सिद्धः ते विनश्वरास्तदन्ये त्वविनश्वरा एवेति आत्मनोऽर्थक्रियाकर्तृ-

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta an

स्वेऽपि अविनाशस्सिद्धो [1]हेत्वभावात् । एतेन ज्ञत्वावरोधोऽप्यात्मनःप्रागुक्तः । तत्तद्विषयसन्निधौ तत्तद्ग्राहकैकस्वभावत्वेन पूर्ववद्भावभेदाभावात् । घटग्रहणात्पूर्वं तु [2]तत्स्वभावभ्रान्तधिया स्वभावभेदेन तद्विरोधभ्रमो भवेदित्येवं निरस्तः । ततश्च ग्राहकस्याविनाशित्वाद्ग्राह्यस्य च वस्तुनोभावान्न मुक्तौ तयोर्विनाशः । अपि तु सर्वज्ञत्वमेव युक्तं । आवृतिस्वभावानां मलकर्ममायाख्यानामविद्यादीनां तदानीं निवृत्तत्वादनावृतस्य ग्राहकस्यावस्थितेः । यदाहुः । 'प्रभास्वरमिदं चित्तं प्रकृत्यागन्तवो मलाः । तेषामभावे सर्वार्थं तज्ज्योतिरविनश्वरं' । इति । एवं सर्वनाशपक्षमाभास्येदानीं ज्ञानकर्तृत्वनाशपक्षं निरसितुमाह ॥

न च ज्ञानक्रियानाश-
स्सर्वागमविरोधतः ।
सदाशे युक्तिबाधा च
तयोर्नित्यत्वदर्शनात् ॥ ४६ ॥

न हि 'द्रष्टुर्दृष्टेर्मन्तुर्मतेर्विपरिलोपो विद्यत' इति । श्रुत्यागमनिरस्तोऽयं मुक्तौ ज्ञानक्रियानभ्युपगमपक्षः । न च सर्वागमविरुद्धं वस्त्वभ्युपगन्तुमुचितं । यदाहुः । 'एकस्य

1हेतुत्वाभावादिति पाठभेदः । 2तत्स्वभावाभावभ्रान्तेति पाठः ।

Center for Shaiva Studies, Pondicherry Collection

blic Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta ar

